RNI No. : DELSAN/2011/38660 ISSN 2321 - 4937

सत्यनिष्ठा जयेल्लेखनी निर्भया

# संस्कृत – संवादः

पाक्षिकं समाचारपत्रम्

संपादकीयकार्यालयः ए-२/३२, वजीराबाद मार्गः, भजनपुरा, देहली-११००५३, दूरभाषः ९३११०८६७५१
ई-मेलः sanskritsamvad@gmail.com वेबसाइटः www.sanskritsamvad.com मूल्यम्-रू. ५/-

卐 वर्षम्-७ 卐 अंकः-२३ (१६५) 卐 १ जूनमासः २०१८ तः १५ जूनमासः २०१८ पर्यन्तम् 卐 विक्रमसंवत्-२०७५ 卐 सृष्टिसंवत्-१,९६,०८,५३,११९ 卐 पृष्ठम्-८


॥ ओ३म् ॥

नाऽन्नोदकसमं दानं न
तिथिर्द्वादशी समा।
न गायत्र्याः परो मन्त्रो
न मातुः परं दैवतम्॥

(चाणक्य-नीति)

॥ ओ३म् ॥

तक्षकस्य विषं दन्ते
मक्षिकायास्तु मस्तके।
वृश्चिकस्य विषं
पुच्छे सर्वाङ्गे
दुर्जने विषम्॥

(चाणक्य-नीति)

## संस्कृतभाषा भारतस्य आत्मा -परमेश्वरनारायणशास्त्रिणः

राजकीय-प्रतिभा-विकास-विद्यालयः, हरिनगरम्, नवदेहली तथा च संस्कृतभारती, नवदेहली इत्यनयोः संयुक्तत्वावधाने




आयोजितं दशदिवसीयसंस्कृतसम्भाषणशिविरं मईमासस्य षड्विंशे दिनांके सम्पन्नं जातम्। शिविरमिदं षोडशदिनांकतः षडविंशतिदिनांकपर्यन्तं प्रचलितम्।

षडविंशदिनांके आयोजिते समापनसत्रे मुख्यातिथयः लब्धप्रतिष्ठाः शिक्षाशास्त्रिणः, राष्ट्रियसंस्कृतसंस्थानस्य मानवसंसाधनविकासमंत्रालयाधीनस्य मानितविश्वविद्यालयस्य कुलपतयः प्रो. परमेश्वरनारायणशास्त्रिणः आसन्। शास्त्रिमहोदयाः कथितवन्तः यत् अग्रिमेषु वर्षेषु तकनीकिशिक्षणसंस्थानेषु, प्रबन्धनसंस्थानेषु पाठ्यक्रमे संस्कृतभाषायाः प्राचुर्यं सर्वे जनाः द्रक्ष्यन्ति। संस्कृतभाषा भारतराष्ट्रस्य आत्मा वर्तते। आत्मनं विना शरीरस्य कापि उपादेयता न वर्तते। राष्ट्रियसंस्कृतसंस्थानेनापि संस्कृतसम्भाषणस्य प्रचारः क्रियते। ते संस्कृतभाषायाः महत्त्वं प्रश्नोत्तरमाध्यमैः छात्रैः सह संवादैः प्रकाशितवन्तः।

विशिष्टातिथयः वेदज्ञाः, वेदविषयज्ञातारः, प्रभारिणः,शोध-प्रकाशनविभागः, राष्ट्रियसंस्कृतसंस्थानस्य प्रो. मनोजकुमारमिश्राः आसन-। मिश्रमहोदयाः कथितवन्तः यत् संस्कृतभाषा राष्ट्रभाषा निश्चितरूपेण एकदिनं भविष्यति इति। ते कथितवन्तः संस्कृतभाषायाः अत्यन्तं महत्त्वं वर्तन्ते।

अध्यक्षाः श्रीमन्तः अजयकुमारचौबेवर्याः प्राचार्याः राजकीय-प्रतिभा-विकास-विद्यालयस्य हरिनगरस्य उक्तवन्तः यत् त्रिभाषासूत्रे संस्कृतभाषायाः अत्यन्तं महत्त्वं वर्तते। इयं भाषा संस्काराणां भाषा वर्तते। संस्कृतं विना भारतं भारतं न इति। अस्माकं प्राचीनकालीनं ज्ञानं संस्कृतभाषया प्राप्तुं वयं शक्नुमः। ते उक्तवन्तः यत् दिनमिदम् ऐतिहासिकं वर्तते यतोहि प्रथमवारम् एतादृशः कार्यक्रमः अस्मिन्

शेषभागःद्वितीयपुटे

## प्रेमचन्द्रशास्त्री उत्तराखण्ड संस्कृत अकादम्याः उपाध्यक्ष रुपे चितः

हरिद्वारम्। उत्तराखण्ड आयुर्वेद विश्वविद्यालयस्य वरीष्ठाचार्य, राष्ट्रियस्वयंसेवक संघस्य समर्पित कार्यकर्ता उत्तराखण्डे



संस्कृतभारत्याः फाउंडर सदस्य डॉ प्रेमचन्द्रशास्त्री उत्तराखण्ड संस्कृत अकादम्याः उपाध्यक्ष रुपे चितः। प्रदेशस्य मुख्यमंत्री श्री त्रिवेन्द्रसिंहरावत संस्कृतस्य विद्वान डॉ प्रेमचन्द्रशास्त्री महोदयं उत्तराखण्डसंस्कृतअकादम्या उपाध्यक्ष रूपे चयनितः कृतवान। डॉ. शास्त्री द्वि दशकेनाधिक समयेन संस्कृतभारत्या संयुक्तो अस्ति। डॉ शास्त्री महोदयस्य उपाध्यक्ष पदे नियुक्ति करणेन बहु समस्यायाः समाधानो जातः पदोऽयं बहु आसेन रीक्तः आसीत येन कारणेन् अकादम्यां नियुक्ति प्रक्रियायां बहु संस्कृतज्ञस्य नामः आसन् डॉ शास्त्री महोदयस्य उपाध्यक्ष पदे हर्षोल्लासेन बहुकालेन् प्रचल्यमान समस्यायाः समाधानं जातम्। श्रीशास्त्री वैदिक मन्त्रोच्चारणस्य मध्ये उपाध्यक्षस्य पदभारं गृहीतवान्। डॉ शास्त्री महोदयस्य उपाध्यक्ष पदे नियुक्त भवनेन संस्कृतस्य विद्वान्सः, शिक्षकाः एवं संस्कृत प्रेमी मध्ये उल्लास अस्ति।

## प्रतियोगिताभाध्यमेन प्रगतेः मार्गः प्रशस्यते-डॉ. बलरामशुक्लः

नवदेहली। दिल्लीसंस्कृतअकादमी माध्यमेन संस्कृत विषये जे.आर.एफ नेट परीक्षायां भागग्राही छात्राय शिक्षणस्य शुभारम्यो अभवत्। अस्मिन्नवसरे प्रशिक्षण केन्द्रस्य उद्घाटन समये दिल्लीविश्वविद्यालयस्य संस्कृतविभागीयाचार्य डॉ. बलरामशुक्ल उक्तवान यत् शिक्षण कार्याय प्रथम आवश्यकता स्व परिश्रमस्याति प्रतियोगितया प्रगतेः मार्गः भवति। आधुनिक युगे बहु प्रतिभासम्पन्न



छात्रमपि प्रतियोगितायाः आवश्यकता भवति। अस्मिन्नवसरे अकादम्याः सचिव जीतरामभट्ट उक्तवान यत् अस्मिन् वर्षे



अध्ययन केन्द्रे 85 (अष्टपञ्चाशत्) छात्राः भागं गृहीतवन्तः। शिक्षा अथवा प्रशासन क्षेत्रं यावत् अधिकं छात्र संचालितो भविष्यति तावदेव समाजस्य विकासो भविष्यति। अस्मिन्नवसरे प्रतिभागिनः स्व परिचयं दत्वा आगामी स्व भविष्यस्य योजनायाः विषये उक्तवन्तः यत् संस्कृत विषये शिक्षाग्रहणस्य उद्येश्य उक्तवन्तः।

## पतञ्जलि योगपीठमाध्यमेन टेलिकॉम क्षेत्रे पदार्पणेन भारतस्य स्वदेशी माध्यमेन आर्थिक शक्ति निर्माणे योगदानम्

हरिद्वार। योगस्यानन्तरं बाबारामदेवः टेलिकॉम क्षेत्रेऽपि पदार्पणं कृत्वा स्वदेशी करणस्य क्षेत्रे योगदानं अददात। ते बीएसएनएल युवा भारत, पतञ्जलि किसान सेवायाः कार्यक्रमेन सह पतञ्जलि कार्ड धारकं बीएसएनएल उत्तराखण्ड मूल्ये एका योजना




माध्यमेन सिम माध्यमेन 144रुपये सर्वेषु संचारेषु (नेटवर्केषु) असिमित वार्तालापः, प्रतिदिनं द्वि जी.बी.डाटा, एकसतं सन्देशः (100एसएमएस) उपलब्धं कारयिष्यति। बाबा रामदेवः उक्तवान यत् स्वदेशी सिम पतञ्जलि संस्थानस्य मुख्य संगठन भारतस्वाभिमान्यास, पतञ्जलि योग समिति महिला प्रकोष्ठ, उपलब्धं कारयिष्यति। बीएसएनएल उत्तराखण्ड मुख्यप्रबन्धक महकसिंह उक्तवान यत् पतञ्जलि संस्थानस्य स्वदेशी अभियानेन सह मेलनं अस्माकं कृते गर्वस्य विषयोऽस्ति। कार्यक्रम बीएसएनएल इत्यस्य महाप्रबन्धक एस.सी कन्नोजिया, उपमहाप्रबन्धक मधुसुदनेन सह बहु गणमान्य जना उपस्थितिः आसन्।

# लेखनस्य क्षेत्रे मह्यम रुचि वाल्यकालादेव आसीत्-डॉ. भारतेन्दुपाण्डेय

नवदेहली। दिल्ली संस्कृतअकादमी दिल्ली सर्वकारमाध्यमेन करोलबाग नवदेहल्यां 'संस्कृतकविना मेलनम्'' 



कार्यक्रमस्यायोजनम् अकरोत्। अद्यतनीय संस्कृतकवि दिल्ली विश्वविद्यालयस्य संस्कृतविभागीयाचार्य डॉ. भारतेन्दुपाण्डेय आसीत्। अस्य कार्यक्रमस्य मुख्यातिथि दिल्लीसंस्कृतअकादम्याः डॉ. कान्ताभाटिया आसीत्। अस्मिन्नवसरे कान्ताभाटिया उक्तवती यत् संस्कृत भाषायाः साहित्यं अनेके विद्वान्सः स्व लेखनी माध्यमेन विश्वं सर्वश्रेष्ठ साहित्यं प्रदत्तम्। वर्तमान समये संस्कृतसाहित्यस्य आधुनिक स्वरुपं जनसामान्य पर्यन्त प्रकाशितुं डॉ भारतेन्द्रपाण्डेयस्य रचना अमूल्य योगदानमस्ति। संस्कृतसाहित्यस्य काव्यपक्ष सवलोऽस्ति अस्य छन्देषु रचनाः सामान्य जनं स्वीयं प्रति आकर्षयति। डॉ पाण्डेयस्य संस्कृत कविता जनेषु बहु कर्णप्रिय एवं ज्ञानबर्द्धकोऽस्ति।

अस्मिन्नवसरे अकादम्याः सचिव डॉ जीतरामभट्टः उक्तवान यत डॉ भारतेन्द्रपाण्डेयस्य संस्कृतसाहित्यस्य लेखने अभूतपूर्व कार्यमस्ति। संस्कृतज्ञः स्वं संस्कृतप्रेमि काव्यस्य साहित्येन् परिचितं कारयितुं अयं कार्यकममायोजितम्। डॉ. पाण्डेयः विद्यार्थी जीवनेन व लेखनं प्रारम्भं कृतवान। यं ते निरन्तरं अग्रसारितं कृतवान व्यवसायस्य क्रमेऽपि डॉ पाण्डेयः साहित्य लेखनाय समयः ददाति स्म।

अस्मिन्नवसरे कार्यक्रमस्य विषये सेन्टस्टीफन्स महाविद्यालयस्य संस्कृतविभागाध्यक्ष डॉ. आशुतोषमाथुर उक्तवान यत् साहित्य लेखनं स्वीये विलक्षण बुद्धेः प्रतिकोऽस्ति। प्रत्येकं विद्वान्सं अभिव्यक्तेः कला नागच्छति। सहस्त्रेषु कोऽपि एवं भवति यो स्व लेखनी माध्यमेन सर्वं आकर्षयति। डॉ. पाण्डेयस्य काव्यं मयापठितम्। अस्य लेखनस्य प्रतिभा स्वीये अद्भुतोऽस्ति।

अस्मिन्नवसरे डॉ पाण्डेयः विस्ताररुपेण उक्तवान यत् लेखनस्य क्षेत्रे मह्यम रूचि वाल्यकालादेव आसीत्। विद्यार्थीजीवनेन न्युन कविता कवितायाः लेखनं प्रारब्धम्। यदा कदापि समयः प्राप्यते संस्कृत साहित्यस्य लेखनं प्रथमं प्राथमिकता प्रददामि।



अस्मिन्नवसरे दिल्ली विश्वविद्यालयस्य संस्कृतविभागीयाचार्य श्री बलरामशुक्लः उक्तवान यत् डॉ. भारतेन्दुपाण्डेय महोदयं अहं बहु वर्षेभ्यो जानामि दिल्लीविश्वविद्यालये उभयोः संस्कृतशिक्षणस्य कार्यं करोति। बहु कविसम्मेलने वयं तेन सह पाठः अकुर्मः। एतेषां रचना संस्कृत जगते बहु लोकप्रियोऽस्ति।

## गुरुग्रामे दशदिनात्मक-शिबिरस्य उद्घाटनम्

वार्ताहरः सतेन्द्रः

20.05.2018 तमे दिनांके शिशपाल विहारे, गुरुग्रामे दशदिनात्मक-शिबिरस्य उद्घाटनम् अभवत् । अस्मिन् शिबरे




मुख्यातिथिः डॉक्टर सत्येन्द्रः सत्यम् महोदय, मुख्याध्यापकः, रा. व. मा. विद्यालयः, सिधरावली अथ च विशिष्टातिथिः सेवानिवृत्तः



ब्रिगेडियर श्रीमान् श्याम मोहन मुरारी, विशिष्ट सेवा पदकालंकृत, भारतीय सेना आसीत् । अस्य कार्यक्रमस्य शुभारम्भः दीपप्रज्वालनेन अभवत् । कार्यक्रमस्य संचालनं श्रीमता प्रमोदशास्त्रिणा कृतम् जनानां संस्कृतभारत्या सह परिचयं कारितम् । तदनन्तरं शिबिरशिक्षकेण श्रीमता सतेन्द्रेण उद्देश्यगीतं 'मनसा सततं स्मरणीयम्' गीतम् । तत्पश्चात् अस्य कार्यक्रमस्य मुख्यातिथिना डा. सत्येन्द्रेण उक्तम् यत् संस्कृत-पठितारः कदापि दुराचारिणः व्याभिचारिणः वा न भवन्ति । ते संस्कारिणः एव भवन्ति । तदनन्तरं विशिष्टातिथिः महोदयः उक्तवान् यत् अस्मिन् शिबिरे मम सम्पूर्णं कुटुम्बकम् स्थास्यति । महोदयः संस्कृत भारत्याः कार्यकर्तृभ्यः धन्यवादं ज्ञापितवान् यत् एते संस्कृतस्य उत्थानाय निस्वार्थभावेन कार्यं कुर्वन्तः सन्ति । अस्मिन् कार्यक्रमे उपचत्वारिंशत् जनाः उपस्थिताः आसन् । सर्वे जनाः अत्र भागं गृहीत्वा प्रमुदिताः आसन् ।

प्रथमपुटस्य शेषभागः

## संस्कृतभाषा भारतस्य आत्मा..

विद्यालये अभवत्।

संस्कृतसम्भाषणशिविरस्य समन्वयकः संस्कृतभाषाविभागस्य अध्यापकः डॉ. कमल-कान्त-बालाणः शिविरस्यास्य प्रतिवेदनं उपाध्यायः प्रदत्तवान्। धन्यवादज्ञापनं सुश्री प्रीतिसिंहः प्रदतवती। सञ्चालकाः जयदेवसिंहवीरः, कृष्णप्रसाद-उपाध्यायः, डॉ. कमल-कान्त-बालाणः च आसन्।



प्रस्तुतवान्। सः कथितवान् यत् शिविरेस्मिन् सप्ततिः छात्राः, दश अध्यापकाः प्रतिदिनं होराद्वयं संस्कृतसम्भाषणस्य अभ्यासं कृतवन्तः। शिविरस्यास्य सजीवप्रसारणं प्रतिदिनं प्रातः अष्टवादनात् दशवादनपर्यन्तं सम्पूर्णे भारतवर्षे विभिन्नसंस्कृतसमूहैः यथा online संस्कृतशिक्षणसमूहैः, फेसबुकलाईवमाध्यमैः, यूट्यूबमिध्यमैः जातम्।

स्वागतभाषणं संस्कृतविभागस्य अध्यापकः कृष्णप्रसाद-

शिविरेस्मिन् संस्कृतभारतीनवदेहलीपक्षतः मुख्यशिक्षिका सुश्री प्रीतिसिंहः, सहशिक्षकः जयदेवसिंहवीरः आसताम्। शिविरस्यास्य समन्वयकौ डॉ. कमल-कान्त-बालाणः, श्री कृष्णप्रसाद-उपाध्यायौ आसताम्।

शिविरस्यास्य वैशिष्ट्यं संस्कृतभाषायां NCC पथसंचलनम्,पञ्जाबीनृत्यं गिद्दायाः संस्कृते नृत्यम्, विद्यालयस्य छात्रैः,छात्राभिः अन्ये विभिन्नाः कार्यक्रमाः आसन्।

# संस्कृतसंगोष्ठी सम्पन्ना

भिवानी। हरियाणा-राज्यस्य भिवानी-नगरे संस्कृतसंगोष्ठी सम्पन्ना तत्र विषयाः आसन् ।

1 आवासीय- संस्कृत- प्रशिक्षणवर्गव्यवस्था।

2 जनपद-संस्कृत- गोष्ठी-आयोजनम्।

3 प्रान्तीय-संस्कृत-सम्मेलनम् आयोजनीयम्।

तत्र मुख्यातिथिरूपेण डॉ श्रेयांश द्विवेदी प्रान्त- उपाध्यक्षः कार्यक्रमस्य अध्यक्षरूपेण प्रो शिवनारायण शास्त्री च समुपस्थितौ। अस्मिन्नवसरे डॉ जयपालः विभागसंयोजकः,डॉ महेशः संस्कृतप्राध्यापकः, श्री अनिलः, श्री जितेन्द्रः, श्री बृजमोहन, श्री धर्मवीरः,श्री सूर्यकान्तः,श्री शिवपालः, श्री अशोकः, श्री रामरतनः, श्री हेमन्तः, श्री संजयः, श्री प्रदीपः प्रभृतयः संस्कृतज्ञाः समुपस्थिताः आसन् ।



# डॉरमाकान्तशुक्लविरचित–'भाति मे भारतम्' इति कालिजयिकाव्यस्य समीक्षणम्

–डॉ अरविन्दकुमारतिवारी
arvindt490@gmail.com

आर्यावताभिधानो भारतदेशो विलक्षणः। यत्र कालिदासादयो महाकावयो जनिं लेभिरे। यैश्च संस्कृतवाणी स्वसूक्ष्मेक्षिकया प्रतिजनं बोधिता। वेदादारभ्य अद्यावधि संस्कष्तं किमपि नवीनमेव रूपमादधाद् विलोक्यते। या भारतीयता वेदे दष्टा, या चोपनिषत्सु ग्रथिता, या च पुराणेषु गुम्भिता, या च रामायणमहाभारतादिमहाकाव्ये दर्शिता सैव कालिदासादिभिः रघुवंशादिमाध्येन नवीनमार्गेण आलिखिता, तामेव भारतीयतां संरक्षन् विलक्षणानुभावो गुररुवरो महामहोपाध्यायो डॉ रमाकान्तशुक्लमहोदयो **भाति मे भारतमिति** काव्यमरचयदिति विजानाति भारतदेशवास्तव्यः संस्कष्तोऽसंस्कृतज्ञो वेति। महानामोदो भवति यदा भाति मे भारतम् इत्यस्य पद्यानि श्रूयन्ते। धन्या वाग्यया काव्यमिदं समलंकृतम्। प्रणम्या लेखनी यया चेदमाविष्कृतं कालिजयि काव्यम्। प्रथितकीर्तिभिरस्य समीक्षणं कृतं बहुभिः, रेडियोद्वारा प्रसारणं बहुबारमस्य कष्तम्, पाठ्यक्रमेष्वपि यत्र तत्र अत्रत्यानि पद्यानि गृहीतानि सन्ति, विदेशेऽपि भाति मे भारतमित्यस्य ध्वनिः श्रूयते। इदमस्य काव्यस्य वैशिष्ट्यमस्ति। बहूनि संस्करणानि जातानि काव्यस्यास्येति। मयापि विद्यार्थिकाले श्रुतमासीत्। किन्तु काव्यमिदमदृष्टमिवासीत्। एकदा देववाणीपरिषदः कार्यक्रमे गतस्तदा गुरुं भाति मे भारतम् इति याचितवान्, परन्तु अनुपलब्धिर्लब्धा। समीहा मे प्रबलवती न विरामं कृतवती। येन केन प्रकारेण मया संस्कृतसंवादपाक्षिकपत्रसंचालकानां श्रीवेदप्रकाशशर्म्ममहोदयानां सौजन्येन प्राप्तमिदमिदानीं समीक्ष्यते। नूनमनेन मदीया वाक् पवित्रीभविष्यतीति मन्ये।

अहमस्मि बालः किन्तु बालोऽपि किमपि ज्ञातुं ज्ञापयितुमुत्सुको भवति। तथैव बहुभिः बहु किमपि अस्य काव्यस्य विषये प्रोक्तं किन्तु प्रतिजाने यन्मदुक्तयो विलक्षणा एव भविष्यन्ति। अस्तु आरभे समीक्षणम्——

रमाकान्तो गुरुः ख्यातो यस्येयं रचनाद्भुता।
भाति मे भारतं ख्याता चोरयते मनो मम।।
क्व शुक्लो महाभागः क्वाहं कृष्णमतिः शिशुः।
तथापि बालभावेन वक्तुमत्र समुद्यतः।।

अष्टोत्तारशतं पद्यानि काव्येऽस्मिन् कुसुमकानने चम्पापाटलारविन्दसुमानीव अनिवर्चनीयपरागैः कविभ्रमरानाकर्षन्तीवेति नात्र संशयः। कीदृशी अकल्पनीया दषष्टिरस्य कविवरस्येति पद्यमेव प्रमाणयति प्रथमं यत्र संस्कषतिसारभूतं तत्त्वमुपायनीकष्तं सुकविनेति। तद् यत् विलोक्यताम्–

विश्वबन्धुत्वमुद्घोषयत् पावनं
विश्ववन्द्यैश्चचरित्रैर्जगत्पावयत्।
विश्वमेकं कुटुम्बं समालोकयत्
भूतले भाति मेऽनारतं भारतम्। 1

नेदं केवलं पद्यमेव दषष्टिमतां तु मणिप्राप्तिरिवेति मन्ये। वसुधैव कुटुम्बकम् इति रूपकं यद् भारतीयत्वं तदत्र स्रग्विणीच्छन्दसा दर्शनीयतां प्राप्तं वर्तते। इदं कवित्वं यन्मोहयति सहृदयानतिति।

सुकविरयं शुक्लो गुरुस्तु एकस्मिन्नेव पद्ये अनेकतासु एकता इति यद् भारतीयानां प्रतीकं तदुभावयति। तदित्थमस्ति–

वेशभूषाशनोपासनापद्धति–
क्रीडनामोदसंस्कारवष्त्यादिषु।
यद्धि भिन्नं सदप्यस्त्यभिन्नं सदा
भूतले भाति मेऽनारतं भारतम्।। 2

जानीमो वयं यद् बहुराज्यवत् भारतमस्माकं दर्शनीयमस्ति। विभिन्नभाषाभाषिणो विभिन्नधर्मावलम्बिनो निवसन्ति सानुरागमत्र। वैधिध्यदृष्ट्या भिन्नं सदपि अभिन्नत्वं लक्ष्यते। अतः भारतं भाति चन्द्रवदिति मन्ये।

विना वेदं विना गीतां विना रामायणीं कथाम्।
विना कविं कालिदासं भारतं भारतं नहि।

इति यत् उक्तं केनचिद् गुरुणा विदुषा तदत्र काव्येऽस्मिन् रमणीयतामादधानमाविर्भवति।

**पाठकानां कृते सूचनाः-**

**कृपया संस्कृत-संवादः पाक्षिकवार्तापत्रस्य ग्राहकत्वं स्वीकर्तुं पञ्चवार्षिकशुल्कं रु ६००/- (संस्थादीनां कृते) द्विवार्षिकशुल्क रु. २४०/- (व्यक्तीनां कृते) मनिऑर्डरः, चैकः ड्राफ्टः, इत्यनेन 'संस्कृत-संवाद' इतिनाम्नः सम्पादकीयकार्यालये प्रेषयेयुः। अथवा अस्यां वित्तकोषसंख्यायां (A/C) शुल्कराशिः प्रेषयितुं शक्यते। वित्तकोषविवरणम्-**

**Sanskrit samvad,**
**Current A/C No. 22490200000142,**
**Indian Overseas Bank, Yamuna Vihar,**
**Delhi-110053**
**IFC Code- IOBA0002249**

यत्त्रयीसांख्ययोगादिमार्गैर्युतं
जीवनं मुक्तमाकर्तुमाकांक्षति।
शीलसन्तोषसत्यादिभी रक्षितं
भूतले भाति तन्मामकं भारतम्।। 7

पद्यमेतत् न केवलं चतुष्पादात्कम् अपितु बहुसारगर्भितमाभाति। भारतीयं जीवनं मोक्षाकांक्षि मन्यते। न भोगो भारतीयानामिष्टः। परिणामतापसंस्कारैर्गुणवषत्तिविरोधाच्च दुःखमेव सर्वं विवेकिनो वदन्ति। विषयवासनारहितमेव जीवनं भारतीयत्वं प्रकल्पयतीवेति को न जानाति। यत्रत्या नार्यः सीतादिप्रभष्तयः शीलप्रभृतिसद्गुणसंवाहिन्यो भारतीयनारीगौरवमभिवर्धयन्ति। पतिसेवनपरा राजकुमारी विपिनं गच्छन्तं स्वामिनमनुयाति। एतद् भारतं विशिष्टम्। हृतापि सर्ववैभवसम्पन्नेन रावणेन राज्ञी भविष्यसीति बोध्यमानापि न तं पतिं मनसापि मन्तुं चिन्तितवती। सा तु तृणपाणिर्भाषते तं दुष्टम्। यत्रत्ःयः सत्यवादी राजा हरिचन्द्रः सत्यरक्षणाय आत्मानमपि विक्रीणीते। मष्तं पुत्रमपि श्मशानमानीतं पत्न्या पश्यन्नपि स्वसत्यधर्मरक्षणाय तत्परो दष्श्यते। अतः एव कविदृष्टौ भारतं भाति।

स्वाभिमानी कविवरो विलिखति यत् न वयं परमुखापेक्षिणः। सर्वमपि करतलमस्माकमिति। यथा–

विद्युदुत्पादने तैलसंशोधने
इन्धनान्वेषणे लौहनिष्पादने।
यन्त्रनिर्माणकार्ये समर्थं च सद्
भूतले भाति मेऽनारतं भारतम्।। 12

भारतं न सामान्यं मन्तव्यं जनैरिति सुकविः पद्येन बोधयति। भारतं भगवन्तं शिवं विविधरूपं मनुते। अत्र चत्वारः पुरुषार्थाः मुनिभिः कल्पिताः मानवोन्नतिं साधयन्ति। इदं सर्वमपि सुकविना गुरुणा स्वकाव्ये समुपनिबद्धमस्ति। अस्मिन् विविधेषु प्रदेशेषु विविधाः श्रव्याः भाषा भाष्यन्ते। किन्तु भारतं सर्वाभिरपि भाषालंकाररूपाभिराभिः समलंकृतमिव चेतश्चमत्करोति। यथा–

संस्कष्तं प्राकृतं तामिलं तेलगुं
कन्नडं कैरलीं बाङ्गमाङ्गलामाङ्ग्लाम्।
वाचमन्यां च तां तां ब्रुवद् वर्धते
राष्ट्राषायुतं मामकं भारतम्।। 23

कविरयं प्रस्तौति रामायणमाहात्म्यं यत् रामायणं न केवलं रामकथावलितं मनोरंजनप्रदम्, अपितु ज्ञानविज्ञानदं वर्तते, अतएव तु बहुभिः महाकविभिः बहु रामायणं विरचितम्। केनचिद् विदुषा कविना मूलरामायणम्, पम्परामायणम्, कम्बरामायणम्, जैनरामायणम्, कृत्तिवासरामायणम्, इति बहुनामक पवित्रमिदं भारतं प्रकाशयति। अतो भारतं भाति इति कविवरस्य आशयो वर्तते। यथा

मूलरामायणं पम्परामायणं
कम्बरामायणं जैनरामायणम्।
कृत्तिवासादिरामायणं श्रावयद्
भूतले भाति मेऽनारतं भारतम्।। 25

भारतं पर्वोत्सवनिबद्धं ललितं वर्तते। अत्र कुम्भपर्व, सोनपुरस्थमेला, रासलीला, रामलीला इति रूपकं पर्व मानवजीवने स्फूर्तिं नवीनतामावहन्ति। सोल्लासं मानवो विस्मृत्य आनन्दं लभमानः अहं भारतीयोऽस्मि इति विभावयन् ईश्वरं प्रणमति। श्रुतमपि यत् भारतभूमिः




स्वर्गादपि रमणीया वर्तते यत्र जनिं लब्धुमीहन्ते देवा अपि। इदं कारणं किमिति शुक्लो गुरुरुद्भावयति। यथा–

कुम्भसिंहस्थवैशाखमुक्तेश्वर–
सोनपूरादिमेलाापकै रंजितम्।
रासलीलायुतं रामलीलायुतं
भूतले भाति मेऽनारतं भारतम्।। 30

अत्र कथं देवानामभिलाषो जनिलाभायेति विज्ञातु शक्नुवन्ति भवन्तो भवन्तः। रम्यमिदं काव्यं यद्यपि वर्तते तथापि गुरवे निवेदयामि। रासलीलायुतं रामलीलायुतं इति पदद्वयमपि सुन्दरं वर्तते। किन्तु भारतं रासलीलामयं रामलीलामयं वर्ततामिति कामये। प्रतिपदमस्मिन् काव्ये गागरे सागर इव दृष्टिं नन्दयति।

सुकविवरो माननीयः शुक्लमहोदयः पण्डितराजं प्रति ब्रूते। यत् श्रृंगारप्रियः कविर्जगन्नाथः न याचे गजालिं न वा वाजिराजिं न वित्तेषु चित्तं मदीयं कदाचित्। इयं सुस्तनी मस्तकन्यस्तकुम्भा लवंगी दृगंगी मदंगीकरोतु। इति यदुक्तं तादृशमपि भारतं भात्येवेति। मया चिन्त्यते यत् महामहोपाध्यायेन एतादृशं कार्यं कश्चित्कविर्न कुर्यादिति ध्वनिना बोधितम्। यतोहि निन्दनीयमिदमासीत्। यदा कदा स्तुतमपि निन्दनीयमेव भवति। अत्यन्ततिरस्कृतध्वनिनेति जानीमो वयम्। अन्यदपि विभावयितुं स्वतन्त्रा वयम्। कथन्नोत्तमं काव्यमिदं मन्यताम्। प्रेम्णा मत्तानां न किमपि रोचते। कामातुराणां न भयं न लज्जा। इति । पण्डितेन्द्रेणेति पदेन ध्वन्यते यत् न तेन व्यर्थं किमपि याचितम्, सुस्तनी याचिता वृतेति। अनेन कवेः श्रृंगारिकी दृष्टिरपि ज्ञातव्या वर्तते। अस्तु स्यात् किमपि किन्तु पद्येनानेन महामहोपाध्यायो वर्णयति यत् पण्डितराजेन नैतत् करणीयमासीति मन्मतम्। अन्यैरपि नैतद् विधेयमित्येवमेव काव्यत्वमत्र।

सुधियः! किं किं वदेयम् समास्वादनीयमिदं काव्यम्। प्रतिपद्यं भारतं दर्पणे चित्रमिवोपस्थितं वर्तते। भारतीया नार्यो नीराजनं कुर्वते। प्रस्तराकष्तयः पूज्यन्ते। गुरुरयं गुणग्राही पूज्यः प्रतिभाति। अयं भारतं निबध्नन् काव्ये विलिखति यत् केषांचिन्मते भवन्तु दोषाः देशेऽस्मिन् किन्तु अस्य मते न भारते दोषाः सन्ति। गुणग्राही गुणान् गृह्णति न तु दोषान्। कविवरदृष्टौ देवतावन्द्यं स्वर्गतुल्यं भारतं कीर्तनीयमस्ति। सदैव भारतं मोदतां वर्धतां राजतामिति कामयमानो नयति पूर्णतामिदमयं काव्यं शुक्लमहोदय इति दष्श्यते। यथा–

सन्तु दोषाः अनेकेऽत्र कैश्चिन्मताः
किन्तु नाहं प्रपश्यामि तान् मन्दधीः।
वन्दनीयं मया कीर्तनीयं मया
मोदतां वर्धतां राजतां भारतम्।। 107

सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः। सर्वे भद्राणि पश्यन्तु मा कश्चिद् दुःखभाग्भवेदिति भारतीयं भावं प्रकटीकुर्वन् सर्वविधं मंगलमभिलषन् महामहोपाध्यायो रमाकान्तशुक्लो गुरुर्वदति यत्

शोषितो नात्र कश्चिद् भवेत्केनचिद्
व्याधिना पीडितो नो भवेत्कश्चन।
नात्र कोऽपि व्रजेद्दीनतां हीनतां
मोदतां मे सदा पावनं भारतम्।। 108

महाकविकालिदास इव गुरुवरः भारतस्य मंगलं कामयते। शाकुन्तलान्ते भरतवाक्यं प्रवर्ततां प्रकृतिहिताय पार्थिवः। इति या भावना सा भाति मे भारतम् इत्यत्र अन्तिमेन पद्येनाभिव्यज्यते। नूनमेव महामहोपाध्यायः डॉ रमाकान्तशुक्लो महोदयः परमदयालुः सहृदयः कविरस्ति, यस्य कालजियकाव्येऽस्मिन् महाकवीनां वाणी नृत्यतीवेति। अस्तु भाति मे भारतमित्यस्य प्रत्येकं पद्यं सुमुधरं सुललितं नवोढोक्तमिव चेतः प्रसादयति। सुकविः गुरुवरः शुक्लो महाशयः नमस्करणीयो येन संस्कृतं सदृढीकृतम्। भारतं कीदृशमिति सरसकाव्येन प्रबोधितम्। दीर्घायुष्यं लभतां मे गुरुरिति कामयमाना लेखनी विरमति।

अमरवाणी विजयताम्।



# सम्पादकीयम्

अयि विविधविद्यानदीकृतावगाहाः!
काव्यपीयूषपानमधुरवचनाः!
सादरं नमोनमः।

भारतं विविधधर्मावलम्बिनां पवित्रदेशो विलसति संसारेऽस्मिन्। अस्ति काचिदस्य विशिष्टता, सा चास्य संस्कृतिरेवास्ति, या संस्कतमूला वर्तते। ज्ञानविज्ञानसम्पन्ना समादरणीयेयं संस्कृतभाषा पुरा मानवजीवनकर्मसु दरीदृश्यते स्म। अधुना तामेव स्थितिं कामयमानाः बहवोऽनुरागिणः प्रवर्तमाना सन्तीति विज्ञायते। किन्तु यदा कदा विरोधिनः संस्कृतक्षेत्रं किमपि एतादृशं कार्यं कुर्वन्ति यैः मानसं दूयते। स्यात् किमपि किन्तु संस्कृतप्रचारशीलैर्न व्यर्थं ध्यानं देयम्। न च वा कलहो विधेयः। स एव स्वलक्ष्यमवाप्नोति यः नकारात्मकवृत्तं न शृणोति। अतः सर्वैरपि संस्कृतानुसन्धित्सुभिरवश्यमेव मिलित्वा कार्यं साधनीयम्।

**सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः।**
**सर्वे भद्राणि पश्यन्तु मा कश्चिद् दुःखभाग्भवेत्।**

इति या भावना संस्कृते लभ्यते नान्यत्र सरसगिरा लब्धुं शक्यते। अयं निजः परो वेति गणना लघुचेतसाम्। उदारचरितानान्तु वसुधैव कुटुम्बकम्। इति मानवीयमूल्यं यदि कापि भाषा शिक्षयति सा संस्कृतमेवास्ति नापरा कापीति को न वेत्ति। अन्यच्च संस्कृतसम्मेलनादीनां संयोजका विनिवेद्यन्ते यत्तैः विश्रुतं सम्मेलनं सुविचार्यैव क्वचिदपि समायोजनीयम्। समयः अनुकूलो भवेत्सर्वेषाम्। न स्थानं विदूरं स्यात् न वा निकटमिति चिन्तनीयम्। यतोहि जनागम एव कार्यक्रमं सफलीकरोति। इदमपि अवधेयं सर्वैरपि यत् सम्मेलने कापि नवीनता स्यात्। केवलं पिष्टपेषणमेव न भवेत्। महान् व्ययः स्वलक्ष्यमवाप्यनुयादिति चिन्तनीयम्।

विज्ञास्तु विदन्त्येव भवन्तो यत्केन कार्येण किं कीदृशं भवितुमर्हति। संस्कष्ता वयम् अकथितमपि जानीम एव। अतः कश्चिदन्यो न निन्दतु तादृशं कार्यं साधनीयम्। अस्माकं मतेन तु विख्यातसम्मेलने शास्त्रार्थो विधेयः, न तु प्रदर्शनार्थम् अपितु परजनबोधार्थमिति विभावये। मूलमेव वच्मि यत् संस्कृतज्ञा एव संस्कृतोन्नतिं सम्यक् कर्तुं शक्नुवन्ति, नापरः कश्चिदिति। इदं सर्वं निभाल्य सर्वमपि दुराग्रहं पक्षपातं भेदभावमुत्सृज्य संस्कृतोन्नयनाय प्रयतनीयम्। भारतीयता संरक्षणीया, विद्वांसः स्मरणीयाः, देशस्य संस्कृतिर्वधापनीया।

अस्तु जयतु संस्कृतं जयतु भारतमिति वदन्ती भवतो नमामि।

## वेदामृतम्

**(ऋग्वेदभाष्यम्)**

(प्रथमाष्टकः प्रथमोऽध्यायः तृतीयोऽनुवाकः)

**पुरा भिन्दुर्युवा कुविरमितौजा अजायत। इन्टो त्त विश्वस्य कर्मणो धुर्ता वज्री पुरुष्टुतः ॥४॥**

अर्थ-इस मन्त्र में श्लेषालङ्कार है। जैसे ईश्वर का रचा और धारण किया हुआ यह सूर्यलोक अपने वज्ररूपी किरणों से सब मूर्त्तिमान् पदार्थों को अलगअलग करने तथा बहुत से गुणों का हेतु और अपने आकर्षणरूप गुण से पृथिवी आदि लोकों का धारण करनेवाला है, वैसे ही सेनापति को उचित है कि शत्रुओं के बल का छेदन साम, दाम और दण्ड से शत्रुओं को भिन्न-भिन्न करके बहुत उत्तम गुणों को ग्रहण करता हुआ भूमि में अपने राज्य का पालन करे ॥ ४ ॥

फिर भी अगले मन्त्र में सूर्य के गुणों का उपदेश किया है

**त्वं वलस्य गोमूतोऽपावरद्रिवो बिलम्।**
**त्वां देवा अबिभ्युषस्तुज्यमानास आविषुः॥५॥**

अर्थ-जैसे सूर्यलोक अपनी किरणों से मेघ के कठिन-कठिन बादलों को छिन्न-भिन्न करके भूमि पर गिराता हुआ जल की वर्षा करता है, क्योंकि यह मेघ उसकी किरणों में ही स्थिर रहता तथा इसके चारों ओर आकर्षण, अर्थात् खींचने के गुणों से पृथिवी आदि लोक अपनी-अपनी कक्षा में उत्तम-उत्तम नियम से घूमते हैं, इसीसे समय के विभाग जो उत्तरायण, दक्षिणायन तथा ऋतु, मास, पक्ष, दिन, घड़ी पर आदि हो जाते हैं, वैसे ही गुणवाला सेनापति होना उचित है ॥५॥

अब अगले मन्त्र में इन्द्र शब्द से शूरवीर के गुणों का उपदेश किया है।

तवाहं शूर रातिभिः प्रत्यायं सिन्धुमावर्दन्।
उपातिष्ठन्त गिर्वणो विदुष्टे तय कारवः॥६॥

अर्थ-इस मन्त्र में लुप्तोपमालङ्कार है। ईश्वर सब मनुष्यों को आज्ञा देता है कि-जैसे मनुष्यों को धार्मिक प्रशंसनीय सभाध्यक्ष वा सेनापति मनुष्यों के अभयदान से निर्भयता को प्राप्त होकर जैसे समुद्र के गुणों को जानते हैं, वैसे ही उक्त पुरुष के आश्रय से अच्छी प्रकार जानकर उनको प्रसिद्ध करना चाहिए तथा दुःखों के निवारण से सब सुखों के लिए परस्पर विचार भी करना चाहिए ॥६॥

फिर भी अगले मन्त्र में सूर्य के गुणों का उपदेश किया है

# आयुषो ज्ञानम्

**-सत्यानन्दझा**
शोधच्छात्रः (स्नातकोत्तरज्योतिषविभागः)
कामेश्वरसिंहदरभङ्गासंस्कृतविश्वविद्यालयः
कामेश्वरनगरम्, दरभङ्गा, बिहारप्रदेशः

आयुर्दायो नाम आयुनिर्धारणप्रकारः। आयुनिर्धारणस्य कतिपयसिद्धान्ताः महर्षिभिराचार्यैश्च स्थिरीकृताः सन्ति, येषु अंशायुः, नैसर्गिकायुः, लग्नायुः, पिण्डायुरित्यादयोऽनेकविधाः सन्ति तेषु पिण्डायुप्रकारः सर्वाधिकः प्रामाणिक इति पराशर-वराहप्रभृतिभिराचार्यैर्महर्षिभिश्च स्व-स्वग्रन्थेषु तत्साधनं प्रतिपादितम्।

पिण्डायुसाधनाय सूर्यादिग्रहाणां ध्रुवाङ्काः निर्धारिताः सन्ति। ते चाङ्काः पिण्डायुध्रुवाङ्काः कथ्यन्ते। पिण्डायुध्रुवाङ्कनिर्धारणे समेषामाचार्याणामैकमत्यमुपलभ्यते। तथाहि वराहः -

**मय-यवन-मणित्थशक्तिपूर्वैः**
**दिवसकरादिषु वत्सराः प्रदिष्टाः।**
**नव-तिथि-विषयाक्षि-भूत-रुद्र-**
**दश-सहिता दशभिः स्वतुङ्गभेषु॥**

मयो नाम दानवः सर्वश्रेष्ठहोरावित् सूर्यलब्धवरप्रसादः, यवनः, म्लेच्छभाषितानां विख्यातदैवज्ञः, मणित्थनाम प्रसिद्ध आचार्यः, शक्तिपूर्वः शक्तिपुत्रः पराशरश्चैतैराचार्यैः स्वोच्चस्थानस्थितेषु सूर्यादिसप्तग्रहेषु सत्सु तेषां ग्रहाणं नव-9, तिथि-15, विषय-5, अक्षि-2, भूत-5, रुद्र-11, दश-10 एते संख्याः दश(10)भिः युक्ताः सन्तः वत्सराः परमायुवर्षाणि कथितानि।

एतावता वराहेण सूर्यस्य 9+10=19, चन्द्रस्य 15+10=25, मंगलसय 5+10=15, बुधस्य 2+10=12, गुरोः 5+10=15, शुक्रस्य 11+10=21, शनैश्चरस्य 10+10=20 इत्येवं सूर्य-चन्द्र-कुज-बुध-गुरु-शुक्र-शनैश्चराणां क्रमशः 19, 25, 15, 12, 15, 21, 20 परमायुवर्षाणि निर्धारितानि। एते एव वर्षाङ्काः, पिण्डायुशब्देन व्यवहृताः भवन्ति।

तथा चोक्तं पराशरेण -

क्रमशः स्व-स्वतुङ्गस्थभास्करादिग्रहेषु हि।
अङ्केन्दुतत्त्वतिथ्यर्कवाणेन्द्विन्दुकराः नखाः।
आयुः पिण्डाः निगदिताः नीचस्थेषु तदर्धकम्।

श्रीमान् कल्याणवर्मापि तथैवाह -

**एकोनविंशतिर्भानो शशिनः पञ्चविंशतिः।**
**तिथयः क्षितिपुत्रस्य द्वादशैच बुधस्य तु॥**
**गुरोः पञ्चदशाब्दानि शुक्रस्याप्येकविंशतिः।**
**विंशती रविपुत्रस्य पिण्डायुः स्वोच्चसंस्थिते॥**

तथैव वैद्यनाथोऽपि -

**नवेन्दवो वाणयुमाः शरक्ष्माः**
**दिवाकराः पञ्चभुवः कुपक्षाः।**
**नखाश्च भास्वत्प्रमुखग्रहाणां**
**पिण्डायुषोऽब्दा निजतुङ्गमानाम्॥**

एतावता 19, 25, 15, 12, 15, 21, 20 वर्षाणि सूर्यादिसप्तग्रहाणां परमायुःप्रमाणं सिद्धयति। एतदेव पिण्डायुः ग्रहदत्तायुः ध्रुवाङ्काश्च कथ्यन्ते।

अथ यस्य ग्रहस्य परमायुः साध्यं भवति तस्य स्पष्टराश्यादिषु तदुच्चराश्यादिकं संशोधनीयम्। तत्र षड्राश्यल्पे सति द्वादशराशिष्वन्तमे तस्य विधेयम्। षड्राश्यधिके तु नैवं कार्यम्। शेषं पिण्डायुनाऽर्थात् पूर्वोक्त तद्ग्रहध्रुवाङ्केन संगुणयेत्। तद् गुणनफलं विकलातः राश्यन्तं सवर्णनं कृत्वा राशिस्थानाङ्कितसंख्यासु 12 इत्यनेन भागे दत्ते यत्तुलमवाप्यते तदेव ग्रहदत्तायुर्भवति।

उदाहरणं यथा - सूर्यस्पष्टराश्यादिः 2.5.25.15 तदुत्तरराश्यादिः 0.10.0 = शेषः = 1.25.25.15, षड्राश्यलग्नात् 12.0.0.0-1.25.25.15 = 10.4.24.45 ञ सूर्यध्रुवाङ्काः 19 = 190.76.640.855, विकलातः राशिं यावत् सवर्णने कृते = 191.27.0.15 इति। तत्र राशिस्थानाङ्कित 191 इत्यस्य 12 इत्यनेन भागे कृते सूर्यस्य आयुर्दायवर्षादिः 15.11.27.0.15 इति सिद्धयति। एवमेव सर्वेषां ग्रहाणामायुर्दायो निर्णयः। तथा चोक्तं पराशरेण -

तुङ्गशुद्धं खगं षड्भादूनं चक्राद् विशोध्य यत्।
पिण्डैः संगुणितं शेषं हायना भादिमानतः॥

एवञ्चोक्तरीत्या साधितायुरेव तत्तद्ग्रहस्य तत्तत्परमायुःप्रमाणमिति सिद्धान्तः।

उच्चनीचवशेन ग्रहाणामायुर्ज्ञानम्

अथ सूर्यादिग्रहाणां पूर्वोक्तायुवर्षादिकं ग्रहेषु पूर्णपरमोच्चस्थितेषु एव भवति। अत एवोक्तं वराहेण पूर्वश्लोके 'स्वतुरङ्गभेषु' इति।

पूर्णतः नीचस्थितेषु ग्रहेषु तु पूर्वोक्तपूर्णायुमानादर्द्धं क्षीयते। अर्थात् यदि ग्रहः नीचराशिस्थितो भवति तदा यद्ध्रुवाङ्काः पठितास्तत्रार्द्धमेव सङ्गणनीयम्। यथा सूर्यो यदि 6.10.0.0 स्थितोऽस्ति तदा सूर्यस्य निर्धारितोनविंशतिवर्षस्थाने सार्धनववर्षाणि (9.6.0) सूर्यस्य परमायुः सङ्गणनीयम्। एवं समेषां ग्रहाणां स्थितिः।

परमनीच-परमोच्चयोर्मध्ये राशिस्थितस्य ग्रहस्य परमायुरनुपातेन साधनीयोऽस्ति। परं जन्मकालिक- स्पष्टग्रह-नीचयोरन्तरात् प्राप्तमायुवर्षादौ नीचवर्षादियोगेन जन्मकालिकस्पष्टग्रहोच्चयोरन्तात्प्राप्तायुवर्षादा- वुच्चवर्षाद्यन्तरेण च स्फुटायुर्भवति।

सञ्चरणवशात्सूर्यसान्निध्यादस्तङ्गतानां सूर्य-चन्द्र-भौम-बुध -गुरूणां ग्रहाणामागतायुषोऽर्द्धं ह्रसति। शुक्रशनैश्चरयोस्त्वस्तङ्गतयोरपि नैष ह्रासः। तथाहि -

अस्तङ्गतो ग्रहः स्वार्धमपहाय सितार्कजौ।

शत्रुक्षेत्रगतानामपि वक्रीभूतग्रहाणां नैष ह्रासो भवति। तथा च वराहः -

शत्रुक्षेत्रगतस्त्र्यंशं हरेद् वक्रगतिम्विना।

अन्यत्रापि -

वक्रचारं विना त्र्यंशं शत्रुराशौ हरेद् ग्रहः।

क्वचिदेवमप्युपलभ्यते यन्मङ्गलं विहायान्ये शत्रुगृहगताः ग्रहाः निजायुर्दाये तृतीयभागं हरन्ति परं शत्रुगृहगतोऽपि भौमः नैवं हरति। तथाहि बादरायणः -

**भूम्याः पुत्रं वर्जयित्वाऽरिभस्तथा।**
**हन्युः स्यात् स्वादायुषस्ते त्रिभागान्॥**

अथायुषो हरणम्

वस्तुतस्तु ग्रहाः स्वकीयमायुःप्रमाणं जातकाय यच्छति यदि ते ग्रहाः युक्त्या दृष्ट्याऽन्यथा वा पीडिता न भवेयुः। किन्तु तादृशी स्थितिः क्वचिदेव भाग्यशालिनो जातकस्य जन्मपत्रे प्राप्यते यत्रैकोऽपि ग्रहोऽशुभयोगेनान्यथा वा पीडितो न भवेत्। अशुभदृष्ट्याऽशुभयोगेनान्यथा वा पीडितेषु ग्रहेषु तत् प्रदत्तायुषि ह्रासोऽनिवार्यो भवति। एवम्विधह्रास एव ज्योतिषशास्त्रे हरणशब्देन व्यवहृतोऽस्ति। तद्धरणं मुख्यतया षड्विधमुपलभ्यते। तद्यथा - 1. क्रूरोदयहरणम्, 2. अस्तङ्गतहरणम्, 3. रिषुक्षेत्रहरणम्, 4. नीचगतहरणम्, 5. खगोपगानां हरणम्, 6. व्ययादिहरणञ्च। तथाहि-

**क्रूरोदयास्तरिपुनीचखगोपगानां**
**रिःफायमाननवरन्ध्रकलत्रगानाम्।**
**कृत्वः यथाहरणषट्कमिनादिकानां**
**लग्नायुषा सहयुते यदि तुल्यमायुः॥**

1. तत्र क्रूरोदयहरणम् - लग्नस्थिते पापग्रहे यदायुषो हरणं भवति तत् क्रूरोदयहरणम्। तथाहि-

**सार्द्धोदितनवांशहतात् समन्तात्**
**भागोऽष्टयुतशतसंख्य उपैति नाशम्।**
**क्रूरे विलग्नसहिते विधिना त्वनेन**
**सौम्येक्षिते दलमतः प्रलयं प्रयाति॥**

2. अस्तङ्गतहरणम् - अस्तङ्गते ग्रहे यदायुषो हरणं तदस्तंगतहरणम्। तत्पूर्वमेवोक्तम् -

**अस्तङ्गताः सर्वं एवार्द्धहानिं**
**कुर्यु हित्वशुक्रमार्तण्डपुत्रौ।**

3. रिपुक्षेत्रहरणम्-शत्रुक्षेत्रगते ग्रहे यदायुषो ह्रासस्तच्छत्रुक्षेत्रहरणम् -

क्षोणीपुत्रं वर्जयित्वा रिपुस्थास्त्र्यंशम्' इति।

4. नीचगतहरणम् - नीचराशिस्थिते ग्रहे यदायुषो ह्रासः - 'नीचस्थानगास्ते तदर्धम्'।

5. खगोपगानां हरणम् - द्वयादिग्रहाः एकस्मिन् राशौ यदा

**शेषभागःपंचमपुटे**

चतुर्थपुटस्य शेषभागः

# आयुषो ज्ञानम्

स्थिताः भवन्ति तदा यदायुषो ह्रासः। तथाहि सत्याचार्यः -

एकर्क्षोपगतानां यो भवति बलाधिको विशेषेण।
क्षपयति यथोक्तमीशं स एव नान्योऽपि तत्रस्थः।।

6. व्ययादिहरणम् - व्ययभावादारभ्य विलोमतः सप्तमभावं यावत् स्थितेषु असद्ग्रहेषु क्रमशः सर्व-अर्द्ध-त्रिभाग-चतुर्थांश-पञ्चमांश-षष्ठांशभागाः स्वायुषः क्षीयन्ते। परं सद्ग्रहेषु तत्र सत्सु तदर्धमर्थात् अर्द्ध-चतुर्थांश-षष्ठांश-अष्टमांश-दशमांश- द्वादशांशभागाः क्षीयन्ते। तथाहि-

**सर्वार्द्धत्रिचरणपञ्चषष्ठभागाः**
**क्षीयन्ते व्ययभवानादसत्सु वामम्।**
**सत्स्वर्द्धं ह्रसति .......................**
**.............................................॥**

एकस्मिन्राशावनेकग्रहाणां सत्त्वे तु बलवतो ग्रहस्यैव अंशस्य तत्र ह्रासः। आयुर्दायसाधने क्षीणचन्द्रो नैव पापः किन्तु शुभ एव। तथाहि पराशरः -

**एकत्रैकस्त्वनेकेषु स्वभागं बलवान् हरेत्।**
**क्षीणेन्दुरत्र विज्ञेयो पापो नैव कदाचन॥**
**आचार्यः कल्याणवर्माप्येतत्सर्वं समर्थयति -**
**सर्वमर्धं तृतीयांशश्चतुर्थः पञ्चमस्तथा।**
**षष्ठांशः क्षयं याति व्ययाद्वामे ग्रहे स्थिते॥**
**सोम्ये चार्धमितो याति नाशं बहुभिरेकगैः।**
**एक एव बली हन्ति स्वायुषः सर्वदा ग्रहः॥**

अथ जीवशर्ममतेन आयुरानयनम्

तत्र वराहवचनम् -

**स्वमतेन किलह जीवशर्मा**
**ग्रहदायं परमायुषः स्वरांशम्।**
**ग्रहयुक्तनवांशराशितुल्यं**
**बहुसाम्यं समुपैति सत्यवाक्यम्॥**

अथ जीवशर्मा नाम प्रसिद्धाचार्यः स्वमतेन 120 वर्ष 5 दिनात्मकानां परमायुषां सप्तमांशाः 17.1.22.8.34 वर्षादयो भवन्ति। तत्तुल्यायुर्दायः उच्चस्थितग्रहाणां भवतीति प्रतिपादितवान्। किन्तु नैतत् सर्वमान्यम्। अतः ग्रहैर्यावन्तो नवांशाः भुक्तास्तत्तुल्यवर्षाणि ग्रहायुर्दायो भवतीति बहवः आचार्याः सत्याचार्यवचनमङ्गीकुर्वन्ति-

'राश्यंशकसंयोगादायुरिह समासतो ग्रहाः दधु'रिति सत्यवाक्यम्।

जीवशर्ममतेन उच्चराशिस्थितग्रहाणां वर्षादि आयुः 17.1.22.8.34 इति भवति। नीचस्थितग्रहाणामायुस्तदर्धं भवति। मध्येऽर्थात् उच्च-नीचयोर्मध्यस्थितस्य ग्रहस्यानुपातेन आयुरानीय पूर्ववत् स्पष्टायुसाधनं विधेयम्। तथाहि तद्वचनम् -

**सप्तदशैको द्वियमौ वसवो वेदाग्न्यौ ग्रहेन्द्राणाम्।**
**वर्षाद्युच्चस्थानां नीचस्थानामतोऽर्धं स्यात्॥**
**मध्येऽनुपातः स्यादानयनं शेषमत्र यत्किञ्चित्।**
**पिण्डायुषा इव कार्यं तत्सर्वं गतितत्त्वज्ञैः॥**

जीवशर्ममतेनानुनपातप्रकारश्चैवंविधः

ग्रहरूपष्टराश्यादिरुच्चराश्यादिश्चेत्युभयोरन्तरं षड्राश्यधिकं स्यात्तदा तस्यैव, षड्राश्यल्पत्वे सति द्वादशराश्यन्तरं विधाय तच्छेषस्य अंशात्मकं कुर्यात्। तदंशं 8641 इत्यनेन संगुण्यं 504 इत्यनेन विभाजिते यद्दिनादि फलान्यायाति तदेव ग्रहस्यायुर्दायोः बोध्यः। तथाहि-

**स्वोच्चशुद्धो ग्रहः शोध्यः षड्राश्यूनो भमण्डलात्।**
**तद्भागाः क्वब्धिषड्भोगिहता वेदाभ्रसायकैः।**
**भक्ताः दिनानि यल्लब्धं तदायुर्जीवशर्म्मजम्॥**

अथोदाहरणम्

स्पष्टसूर्यः 0.6.49.40 - 0.10. = 0.3.10.20 षड्राश्यल्पत्वात् 12.0.0.0 - 0.3.10.20 = 11.26.49.40 इत्यस्यांशाः 356.49.40 - 8641 = 3083348.49.40 ७ 504 = लब्धिदिनादि 6117.45.20 एतस्य वर्षादि 16.11.27.45.20 इति सूर्यस्यायुर्दायः। एवमेव समेषां ग्रहाणां बोध्यम्।

अथ सत्यमतेन ग्रहाणामायुरानयनम्

सत्याचार्यमतेनैवंविध आयुसाधनप्रकारः बृहज्जातके वर्णितस्पष्टग्रहराश्यादिकं कलात्मकं विधाय तच्छतद्वयेन भक्ते यल्लब्धिरवाप्यतेतद्यदि द्वादशाधिकं स्यात्तदा द्वादशने भक्ते सति शेषः वर्षम्, पूर्वशेषस्य मासादिकं साध्यम्। एवमेव सर्वेषां ग्रहाणामायुरानयनं विधेयम्।

**सत्योक्ते ग्रहमिष्टं लिप्तीकृत्वा शतद्वयेनाप्तम्।**
**मण्डलभागविशुद्धेऽब्दाः स्युः शेषात्तु मासाद्याः॥**

बादरायणोऽपि तथैवाह -

**राश्यंशकलागुणिता द्वादशनवभिः ग्रहस्य भगणेभ्यः।**
**द्वादशाहतशेषेऽब्दमासदिननाडिकाः क्रमशः॥**

तदुदाहरणं यथा -

स्पष्टग्रहः 2.5.10.0 इत्यस्य कलाः 2910 शतद्वयेन भक्ताः 2910 ÷ 200 = लब्धिः 19 इत्यस्य द्वादशतष्टमवशेषं 7 वर्षाणि। पूर्वशेषं 110 इति द्वादशगुणितं 110 x 12 = 1320 इति शतद्वयेन भक्तं 1320 ÷ 200 = 6 मासाः शेषं 120 त्रिंशद्गुणितं 120 - 30 = 3600 ÷ 200 18 दिनानि। एवं जातमायुवर्षादिः 7.6.18.0 इति।

सत्याचार्यमतेन ग्रहाणामानीतायुसंस्कारे अन्याचार्यापेक्षया विशेषतेयं समुपलभ्यते यत् ये ग्रहाः स्वोच्चराशौ स्थिताः वक्रीभूताः वा तेषामानीतायुवर्षादिकं त्रिगुणितं कार्यम्। ये च वर्गोत्तमनवांशगताः स्वनवांशगताः स्वद्रेष्काणागताः स्वराशिस्थिताः वा तेषामानीतायुवर्षादिदकं द्विगुणितं कार्यम्। शेषाः प्रक्रियाः पूर्वोक्तविधिनैव विधेयाः।

एतावता शत्रुगृहगतानां तृतीयांशहानिः अस्तङ्गतानामर्धहानि चक्रार्धहानिरित्यादयो अन्याचार्यसदृशा एव ज्ञेयाः। तथाहि -

**स्वतुङ्गवक्रोपगतैस्त्रिसङ्गुणं**
**द्विरुत्तमस्वांशकमत्रिभागगैः।**
**इयान् विशेषस्तु भदत्तभाषिते**
**समानमन्यत्प्रथमेऽप्युदीरितम्॥ इति**


सन्दर्भग्रन्थाः

1. जातकपारिजात, श्रीदैवज्ञवैद्यनाथ, श्रीमातृप्रसादशास्त्री, चौखम्बा संस्कृत संस्थान, वाराणसी, 2004
2. मुहूर्तचिन्तामणि, श्रीमद्रामदैवज्ञ, डॉ. ब्रह्मानन्दत्रिपाठी, चौखम्बा सुरभारती प्रकाशन, वाराणसी, द्वितीयसंस्करण, 2000
3. बृहज्जातकम्, श्रीवराहमिहिर, डॉ. रामचन्द्रपाठक, चौखम्बा प्रकाशन, वाराणसी, वि. सं. 2063
4. बृहत्पराशरहोराशास्त्रम्,श्रीपराशरमुनि, दैवज्ञ पं. देवचन्द्रझा, चौखम्बा प्रकाशन, वाराणसी, वि. सं. 2069
5. भारतीय ज्योतिष, डॉ. नेमिचन्द्रशास्त्री, भारतीयज्ञानपीठ प्रकाशन, नई दिल्ली, 1996
6. भारतीय ज्योतिषशास्त्रस्येतिहासः, आचार्यलोकमणिदहालः, चौखम्बा सुरभारती प्रकाशन, वाराणसी, द्वि. सं. 2003
7. सर्वार्थचिन्तामणि, श्रीवेङ्कटेशशर्मा, गुरुप्रसादगौड़, चौखम्बा सुरभारती प्रकाशन, वाराणसी, 2011
8. सारावली, श्रीमद्कल्याणवर्मा, डॉ. मुरलीधरचतुर्वेदी, मोतीलाल बनारसीदास, वाराणसी, 2003


# गलज्जलिका

-डॉ. राजेन्द्रत्रिपाठी 'रसराजः'

अधरामृतं पीत्वा प्रीतिं मे मनसि वर्धय।
नयनाम्बुजं दृष्ट्वा मैत्रीं मे मनसि दर्शय।1।

गगनेऽपिविना चन्द्रं तारा नहि शोभन्ते।
मुखमण्डलं स्पृष्ट्वा हस्तं मे शिरस्यर्पय।2।

कुसुमं ललितं लब्ध्वा मुदितो मधुपो रमयति।
गायं गायं मधुरं सरसं गीतं गुञ्जय।3।

निकटेऽपि निवसतापि क्रौञ्चः क्रौञ्च्यै क्रन्दति।।
अभिशप्तप्रणयपाशं दूरीकर्तुं मुञ्चय।।

दूरे दूरे भूत्वा दुर्लभं दर्शनं वै।
पार्श्वमागत्य प्रिये! स्वगतं प्रणयं जल्पय।4।

शून्यं दृष्ट्वा गेहं लभते न रहसि सौख्यम्।
सार्धेन मया वसितुं संश्रित्य सपदि रञ्जय।5।

दर्शं दर्शं फलके श्रावं श्रावं यन्त्रे।
मैत्रीं स्वीकृत्य सखे! चित्रैः सह त्वं सज्जय।6।

सम्भूय सम्मुखं मे सन्तापं शमयित्वा
मन्दं मन्दमागत्य सस्नेहमालिङ्गय।7।

रागानुरागिणी त्वं राधा रसिकस्य प्रिया।
रसराजं वीक्ष्य प्रिये मधुराभक्त्या ह्लादय।8।

# वेदना

-अरविन्दतिवारीः

इदानीं भारती देशे सुतैः संरक्ष्यते विरलैः।
न विज्ञो गृह्यते वृत्तौ विमूढो चीयते सबलैः। 1

सुविज्ञो ज्ञायते विबुधैः समक्षस्थो ध्रुवं कैश्चित्
प्रभो नो पृच्छ्यते सम्यक् विधूर्तैः पृच्छकैश्चपलैः।2

न शास्त्रार्थो जनैः पृष्टो न भावार्थः समाम्नातः।
न पद्यं संश्रुतं मधुरं न्वहम्मन्यैरहो प्रबलैः। 3

न भावः संस्कृतस्तेषां न रावः संस्कृतो येषां
विसर्ज्यत एव विद्वांस्तैर्विशिष्टो मूढजैर्विकलैः।4

कदैषा कुव्यवस्थेयं विनष्टा देशतो भविता।
हरे ध्यानं त्वया देयं हृदा भाषे रवैरमलैः।5

वृथा गीता स्वदेशेह्यस्मिन् वृथा वेदोक्तयो न कथम्?
मुनीनां भारतं दनुजैः प्रदुष्टं रम्यकं निखिलैः। 6

मदुक्तं मन्यतां त्वरितं समाजार्थं प्रियं वचनम्।
स्वदेशात् त्वं विदेशं नीयसे निगदाम्यहं कुखलैः।। 7

# न हातुं समीहे

-डा. संजयकुमारचौबे

अहं भैक्षवृत्तिं न हातुं समीहे
सुधांशं परेभ्यो न दातुं समीहे।

वसन् रम्यहर्म्ये त्वहं कोमलाङ्गो
रवेस्तीक्ष्णतापे न यातुं समीहे।

कृतं क्रन्दनं पूर्वजैर्मे प्रभूतं
व्रजन् तत्सरण्यां न गातुं समीहे।

परागप्रियो भूरि जातोऽस्मि लोके
गलन्निम्बसारं न पातुं समीहे।

सदालोचनामुद्यतोऽस्मीह कर्तुं
परं स्वस्य वीर्यं न मातुं समीहे।

अविश्रान्तमर्चे स्वदेवं हि भीमं
परं तत्सुमन्त्रं न पातुं समीहे।






# 'मनोगतम्' - 44

## प्रसारण-तिथिः - 27-05-2018



-संस्कृत-भाषान्तरं
द्वारा- डॉ.बलदेवानन्द सागरः
Cell- 9810 5622 77
Email - baldevanand.sagar@gmail.com

नमस्कारः ! 'मन की बात'-प्रसारणस्य माध्यमेन पुनरेकवारं भवतः सर्वान् मेलितुम् अवसरम् अवाप्नवम् । नूनं, भवन्तः सर्वे सम्यक्तया स्मरन्ति यन्नौ-सेनायाः षण्णां महिलाधिपानां वृन्दमेकं विगतेभ्यः कतिपयेभ्यः मासेभ्यः समुद्रयात्रा-निरतम् आसीत् । 'नाविका-सागर-परिक्रमा' - इति, अस्य विषये किमपि वक्तुमिच्छामि । भारतस्य एताः षट् तनयाः, आसां वृन्दं प्रायेण सार्ध-द्वि-शताधिकानि दिनानि यापयित्वा समुद्रमाध्यमेन INSV-तारिणी-द्वारा अशेष-जगतः यात्राम् विधाय मासेह्यस्मिन् एकविंशति-तमे दिने भारतं प्रत्यागतम्, सम्पूर्णोह्यपि देशः आसां वीर-पुत्रिकाणां सोत्साहं स्वागतमकरोत्। एताः विभिन्नानांमहासागराणां कतिपयानाञ्च समुद्राणां यात्रां कुर्वन्त्यः प्रायेण द्वाविंशति-सहस्रस्य nautical miles-इति नाविक-क्रोशकानाम् अन्तरालं प्रपूरितवत्यः । अशेष-जगति स्वप्रकारिका प्रप्रथमेयं घटना अवर्तत। विगत-बुधवासरे आसां सर्वासामपि पुत्रिकाणां मेलनस्य, आसाञ्च अनुभव-श्रवणस्य अवसरं प्राप्नवम् । आसां दुहितर्णां साहस-प्रदर्शनार्थं, नौसेनायाः प्रतिष्ठा-वर्धनार्थं, भारतस्य मान-सम्मान-सम्वर्धनार्थं, विशेषेण च सम्पूर्णमपि विश्वमिदं जानीयात् यत् भारतस्य कन्यकाः न्यूनतराः नैव सन्ति - इति सन्देश-प्रापणार्थञ्च भूरि भूरिशो अभिनन्दनानि पुनरेकवारम् अर्पयामि । Sense of adventure- इति साहस-भावं को नाम नैव जानाति? यदि वयं मानव-जातेः विकासयात्रामवलोकयेम, तदानुभवामः यत् कस्यचिदपि साहसस्याङ्कादेव प्रगतिः सञ्जातास्ति। विकासस्तु पराक्रमस्य अङ्के एव जायते। किञ्चित्-करणस्य समीहा, किञ्चित्-विशिष्टानुष्ठानस्य चेष्टा, किञ्चिद् असामान्याचरणस्य साहसम्, अहमपि किमपि कर्तुं शक्नोमि -एतादृक्-भावानुभविनो भवन्तु नाम न्यूनतमाः,परञ्च युग-युग-पर्यन्तं, कोटि-कोटि-जनाः प्रेरणामवाप्नुवन्ति । विगतेषु दिनेषु भवन्तः दृष्टवन्तः स्युः, Mount Everest-शिखरम् अधिरूढवतां विषये कानिचन नूतनानि तथ्यानि प्रकाशितानि, तथा च, शताब्देभ्यः Everest-शिखरं मानवजातिं समाह्वयत् आस्ते, साहसिकाश्च तत्-समाह्वानमपि स्वीकुर्वन्तो वर्तन्ते।

मासेह्यस्मिन् षोडशे दिनाङ्के महाराष्ट्रस्य चन्द्रपुरस्य आश्रम-विद्यालयस्य- मनीषा-धुर्वे, प्रमेश-आले, उमाकान्त-मडवी, कविदास-कातमोढे, विकास-सोयाम-चेति पञ्चानां जनजातीयच्छा- त्राणाम् - अस्माकं आदिवासि-बालकानां वृन्दमेकं जगतः उच्छ्रित-तमं शिखरम् अध्यारोहत् । आश्रम-विद्यालयस्य एते च्छात्राः विगते वर्षे ऑगस्ट्-मासेप्रशिक्षणमारभन्त । वर्धा-हैदराबाद-दार्जिलिंग-लेह-लद्दाखेत्यत्र एतेषां प्रशिक्षणं सम्पन्नम् । एते युवानः 'मिशन-शौर्य'-इति कार्यक्रमान्तर्गतं चिताः आसन् तथा च, नामानुरूपम् Everest-शिखरम् अधिरुह्य ते कृत्स्नस्य देशस्य गौरवं वर्धितवन्तः। अहं चन्द्रपुरस्य विद्यालयीय-सदस्यान्,एतानि च, कनिष्ठानि मित्राणि भूरि भूरि हार्दिकानि वर्धापनानि वच्मि। नातिचिरं षोडश-वर्षीया शिवाङ्गी-पाठकः, नेपाल-पक्षतः Everest-विजयित्रीषु अल्पवयस्का भारतीया महिला सिद्धा। तनया शिवाङ्गी भूरिशो वर्धाप्यते।

अजीत-बजाजः तस्य तनया च दीया Everest-शिखरारोहिषु पुत्री-पित्रोः प्रथमः भारतीय-युगलः सम्वृत्तः। न केवलं युवानः एव,Everest-शिखरारोहणं कुर्वन्ति। सङ्गीता-बहलः मासेह्यस्मिन् ऊनविंशे दिने Everest-शिखरम् आरूढवती, सा च पञ्चाशद्-वर्षाधिकायुष्मती वर्तते Everest-शिखरारोहिषु केचन तादृशाः अपि सन्ति, ये हि प्रदर्शितवन्तः यत्तेषां पार्श्वे न केवलं कौशलमस्ति, परञ्च ते सम्वेदनशीलाः अपि सन्ति। नातिचिरं 'स्वच्छ-गङ्गाभियान' स्य अन्तर्गतं सीम-सुरक्षा-बलस्य समूहः Everest-शिखरारोहणम् अकरोत्, परञ्च सम्पूर्णोह्यपि समूहः Everest-शिखरात् विपुलम् अवकर-चयं चित्वा आत्मना साकमेव भूतलमानयत् । कार्यमिदं नूनं प्रशंसनीयम्, युगपदेव स्वच्छतां प्रति, पर्यावरणं प्रति च तेषां प्रतिबद्धतामपि प्रदर्शयति। Everest-शिखरारोहिणः सर्वेह्यपि सफलाः साहसिकाः वीराः विशेषेण च पुत्रिकाः भूरि भूरि हृदयेन वर्धाप्यन्ते।

मम प्रियाः देशवासिनः, विशेषेण च मम युवानः सखायः! प्रत्यग्रं, मास-द्वय-पूर्वं यदा अहं fit India-इति स्वस्थ-भारताभि- यानस्य प्रस्तावम् उपस्थापितवान्, तदा नाहं चिन्तितवान् यत् एतदर्थम् एतादृक् समीचीनम् उत्तरम् अवाप्स्यते इति । इयत्यां विपुलायां संख्यायां प्रत्येकमपि क्षेत्रस्य जनाः एतत् समर्थयिष्यन्ति । यदाहं fit India- इति स्वस्थ-भारताभियानम् अधिवच्मि तदेदं स्वीकरोमि यत् यावद् वयं क्रीडिष्यामः, तावदेव देशः क्रीडिष्यति। सामाजिक-सञ्चार-माध्यमेषु जनाः fit India-इति स्वस्थ-भारताभियान-विषयकाणि समाह्वानानि अभिलक्ष्य दृश्य-सान्द्रिकाः सम्विभाजयन्ति, तेषु मिथः अङ्कनं कृत्वा परस्परं समाह्वयन्ति। साम्प्रतं Fit India-अभियानेन साकं सर्वोह्यपि जनः आत्मानं संयोजयति। भवन्तु नाम ते चलचित्र-जगतो जनाः, क्रीडा-सम्बद्धाः वा देशस्य सामान्य-नागरिकाः, भवन्तु ते सैनिकाः, आहोस्वित् विद्यालयीयाः शिक्षकाः, परितः एकमेव निनाद-गुञ्जनं श्रूयते- 'हम fit तो India fit'- वयं स्वस्थाश्चेत् भारतं स्वस्थम्। मम कृते प्रसन्नतायाः विषयोह्ययं यद् भारतीय-क्रिकेट्-वृन्द-नायको विराट्-कोहली-वर्यः मामपि समाह्वयत्, तथा चाहं तस्य समाह्वानमिदं स्वीकृतवान्। मन्ये यदेतादृशं भद्रत्वाय कल्पते, एतादृक् समाह्वानं अस्मान् अपरान् च सततं स्वस्थता-सन्धारणार्थं प्रोत्साहयिष्यति।

मम प्रिया: देशवासिनः! 'मन की बात'-कार्यक्रमे नैकधा क्रीडा-सम्बद्धाः, क्रीडक-सम्बद्धाः, केचन ईषद्-विषयाः च भवन्तो मम मुखात् श्रुतवन्तः एव तथा च, विगते प्रसारणे तु, राष्ट्र-मण्डलीय-क्रीडास्पर्धानां अस्मदीयाः नायकाः, निज-मनोगतानि, अस्य कार्यक्रमस्य माध्यमेन अस्मान् वर्णयन्ति स्म-

'नमस्कारः, महोदय! अहं छवि-यादव: नोएडा-तः वदामि, अहं भवतः 'मन की बात'-प्रसारणस्य नियमिता श्रोत्री, तथा चाद्य भवन्तं नैजं मनोगतं श्रावयितुमिच्छामि। अद्यत्वे ग्रीष्मावकाशः आरभत तथा च, मातृरूपेण पश्यामि यत् बालाः अधिकांशतया इन्टरनेट्-games-इति अन्तर्जालीयाः क्रीडाः क्रीडन्तः एव कालं यापयन्ति, परञ्च यदा वयं किशोराः आस्म: तदा प्रायेण traditional games-इति पारम्परिकाः क्रीडाः क्रीडन्तः आस्मः, एताः प्रायेण गृहेभ्यः बाह्याः भवन्ति स्म। सप्तानां प्रस्तर-खण्डानां क्रीडा,खो-खो-क्रीडा-प्रभृतयः चाद्यत्वे विलुप्ताः प्रतीयन्ते। ममेदं निवेदनं यत् भवान् अद्यतनान् युव-किशोर-जनान् पारम्परिक-क्रीडा-विषये प्रबोधयतु, येन हि तेषामपि अभिरुचिः एतदर्थं प्रवर्धेत, धन्यवादः।'

छवि-यादव महाभागे, भवत्याः दूरभाषाकारणायाः कृते भूरिशो धन्यवादाः। सत्यमिदं यत् याः क्रीडाः कदाचित् प्रतिवीथी, प्रत्येकमपि बालस्य जीवनस्य अङ्गत्वेन अवर्तन्त, ताः सम्प्रति न्यूनीभवन्ति। एताः क्रीडाः विशेषेण ग्रीष्मावकाशस्य अङ्गत्वेन भवन्ति स्म। कदाचित् मध्याह्ने, कदाचिच्च रात्रौ भोजनानन्तरं निश्चिन्तं बालाः सुदीर्घ-कालं यावत् क्रीडन्ति स्म, तथा च, काश्चन क्रीडास्तु तादृश्यः आसन् यदशेष-कुटुम्बं युगपदेव क्रीडति स्म - कश्मीरतः कन्याकुमारीं यावत्, कच्छतः कामरूपं यावत् एताः अपरिमिताः क्रीडाः प्रत्येकमपि जनस्य शैशवस्य अङ्गत्वेन भवन्ति स्म। अस्तु, सम्भाव्यते, यदेताः क्रीडाः विविधेषु स्थलेषु पृथक्-पृथक्-नाम्ना अभिज्ञायन्ते स्म, यथा 'पिट्ठू' इति खेला विविधैः नामभिः परिज्ञायते। कश्चन एनां 'लागोरी', अपरः'सातोलिया', इतरः'सात-पत्थर', अन्यः 'डिकोरी', परश्च 'सतोदिया' न जाने, कति कति नामानि सन्ति एकस्याः एव खेलायाः। अस्माकं देशस्य विविधतायाः पृष्ठ-भूमौ निहिता एकता एतासु क्रीडासु अपि अवलोकयितुं शक्यते। एका एव क्रीडा भिन्न-भिन्नेषु स्थानेषु, नाना-नामभिः अभिज्ञायते । अहं गुर्जरीयः, जानामि यत् गुजराते एका खेलास्ति, या हि 'चोमल-इस्तो' इति निगद्यते । खेलेयं प्रायेण प्रत्येकमपि राज्ये क्रीड्यते स्म । कर्नाटके एषा 'चौकाबारा', मध्यप्रदेशे 'अत्तू',केरळे 'पकीड़ाकाली', महाराष्ट्रे 'चम्पल', तमिलनाडौ 'दायाम' वा 'थायाम', राजस्थाने च 'चंगापो' इति न जाने, कियन्ति नामानि आसन् परञ्च खेलनानान्तरम् अवगम्यते यत् प्रत्येकमपि राज्यवासी, विनैव भाषाज्ञानं कथयितुमर्हति स्म - अहो बाढम् ! वयमपि खेलामेनां क्रीडन्तः स्मः। अस्मासु को नाम तादृशो भविता येन शैशवे 'गिल्ली-दण्डा'-इति खेला न खेलिता। 'गिल्ली-दण्डा'-इति क्रीडा लघु-ग्रामेभ्यः आरभ्य महानगरेषु अपि क्रीड्यमाना खेलास्ति। देशस्य नानाभागेषु एषा विविधैः नामभिः अभिज्ञायते । आन्ध्रप्रदेशे 'गोटिबिल्ला' अथवा 'कर्राबिल्ला',उड़ीसा-राज्ये 'गुलिबाड़ी', महाराष्ट्रे 'वित्तिडालू' चेत्यादिभिः विविधैः नामभिः क्रीडैषा निगद्यते। यदा वयं खेलामः, अस्मासु ये अनुपमाः गुणाः सन्ति, तान् वयम् उन्मुक्ततया प्रकटयितुं शक्नुमः। स्यात् भवन्तः दृष्टवन्तः यत् केचन बालाः ये लज्जालवः सन्ति, परञ्च क्रीडावसरे ते अतिचञ्चलाः भवन्ति, स्वं प्रकटयन्ति, ज्येष्ठाः ये गम्भीराः प्रतीयन्ते, खेलावसरे तेषु प्रच्छन्नः बालः बहिरागच्छति। पारम्परिकाः खेलाः किञ्चित् एतादृश्यो वर्तन्ते यत् शारीरिक-क्षमतया साकमेव ताः अस्मदीयां तार्किक-विचारणां, एकाग्रताम्, अवधानतां, स्फूर्तिञ्चापि सम्वर्धयन्ति। तथा च, क्रीडाः न केवलं क्रीडाः एव भवन्ति, ताः अस्मान् जीवन-मूल्यानि शिक्षयन्ति। केन प्रकारेण लक्ष्यं निर्धारणीयम्, दृढ़ता केन प्रकारेण अवाप्तव्या,Team spirit- इति समूहभावः केन प्रकारेण समुत्पादनीयः, परस्परं सहयोगः कया रीत्या च सम्वर्धनीयः? विगतेषु दिनेषु अहं पश्यन्नासं यत् व्यवसाय-प्रबन्धनेन सम्बद्धेषु प्रशिक्षण-कार्यक्रमेषु अपि समग्र-व्यक्तित्व-विकासस्य अन्तःसम्बन्ध-कौशलस्य च सम्वर्धनार्थमपि अस्मदीयाः पारम्परिक्यः क्रीडाः अद्यत्वे उपयुज्यन्ते, तथा चातिसरलतया समग्र-विकासार्थं अस्माकं पारम्परिक्यः क्रीडाः समुपयोगिन्यो भवन्ति। बालाः भवन्तु वा पितामहो वा पितामही, आहोस्वित्, मातामहो वा मातामही, यदा सर्वे मिलित्वा खेलन्ति तदा युगान्तरालं सहसा विलुप्यते। युगपदेव, वयं स्वीयां संस्कृतिं परम्पराश्चापि सम्यक्तया अवगच्छामः। काश्चन क्रीडास्तु अस्मान् समाज-पर्यावरणादि-विषये जागरूकान् विदधति। कदाचिच्च चिन्ता भवति यत् अस्मदीयाः एताः क्रीडाः कर्हिचित् विलुप्ताः नैव स्युः, एवं जाते सति, न केवलं क्रीडाः, अपि तु,शैशवमपि विलुप्तं भविता, तथा च, पुनः वयं ताः कविताः शृण्वन्तो भविष्यामः -

यह दौलत भी ले लो
यह शौहरत भी ले लो
भले छीन लो मुझसे मेरी जवानी
मगर मुझको लौटा दो बचपन का सावन
वो कागज की कश्ती, वो बारिश का पानी ...

गीतमिदमेव वयं शृण्वन्तो भविष्यामः, अत एव, एताः पारम्परिकाः खेलाः न कथमपि विलोपनीयाः सन्ति, अद्यत्वे नूनमिदम् आवश्यकं यत् विद्यालयाः, वीथ्यः वसतयश्च युवमण्डलानि च पुरोभूत्वा एताः क्रीडाः विवर्धयेयुः। आसां क्रीडानां दृश्याङ्कनं विधाय सान्द्र-मुद्रिकाः विरचयितुं शक्यन्ते, यासु क्रीडानां नियमाः, खेला-पद्धतयश्च प्रदर्शनीयाः स्युः। Animation- इति रेखा-वार्णिक-चलचित्राणि विनिर्मातुं शक्यन्ते येन अस्मदीयाः नूतनाः सन्ततयः, एताः वीथी-वसति-क्रीडाः द्रक्ष्यन्ति, खेलिष्यन्ति, विकसिष्यन्ति च।

मम प्रियाः देशवासिनः! आगम्यमाने जून-मासीये पञ्चमे दिने अस्माकं देशः भारतम् अधिकृतरूपेणविश्व-पर्यावरण-दिवसस्य आतिथेयत्वं विधास्यति। एषा हि भविष्यति भारतस्य कृते अतितरां महत्वपूर्णा उपलब्धिः, तथा च, जलवायु-परिवर्तनस्य न्यूनीकरण-दिशायां जगति भारतस्य वर्धमानाय नेतृत्वाय अपि स्वीकृति-प्राप्तेः परिचायिका अस्ति। ऐषमः क्रमे विषय-वस्तु वर्तते 'Beat Plastic Pollution'- अभिघट्य-प्रदूषणस्य पराभवः। ममेदं विनिवेदनं यत् भवन्तः सर्वे अस्य विषय-वस्तोः, भावं,महत्वञ्च अवगम्य वयं सर्वे सुनिश्चितं करवाम यत् वयं polythene, low grade plastic-इति अभिघट्य-वस्तूनि नैव उपयुञ्ज्युः, तथा चास्माकं प्रकृतौ वन्य-जीवने स्वास्थ्योपरि च जायमानम् अभिघट्य-प्रदूषणस्य नकारात्मकं प्रभावं न्यूनीकर्तुं,प्रयतेम। भवन्तः World Environment Day-इत्यस्य website wed-india2018-इत्यत्र गत्वा तत्र रोचक-रीत्या प्रदत्तान् अनेक-विधान् परमर्शान् पश्यन्तु, अवगच्छन्तु, तान् च निज-दैनन्दिने जीवने क्रियया अन्वेतुं प्रयतेरन् । यदा भीषणः निदाघो भवति, जलप्लावनं जायते। अनारतं वर्षा भवति। असह्यं

शेषभाग:सप्तमपुटे

**षष्टमपुटस्य शेषभागः**

शैत्यमापतति तदा सर्वेह्यपि विशेषज्ञाः भूत्वा global warming, climate change चेति जागतोष्णता-ऋतुपरिवर्तन-विषयान् सततं कथयन्ति परञ्च केवलं कथन-मात्रेण एव किं कार्यं सेत्स्यति ? प्रकृतिं प्रति संवेदनशीलत्वं, प्रकृतेः संरक्षणञ्च अस्मदीयः सहजः स्वभावः स्यात्, अस्माकञ्च संस्कारेषु भवेत्। weather pattern- इति ऋतु-पद्धतिषु परिवर्तन-कारणात् विगतेषु केषुचिद्दिनेषु देशे तीव्र-प्रभञ्जन-वात्या-चक्राणि दुरापन्नानि, महती च जन-धन-क्षतिः जाता, अस्मदीया संस्कृतिः, अस्माकं परम्पराश्च नास्मान् प्रकृत्या संघर्षणम् अशिक्षन्त। प्रकृत्या साकं सद्भावेन स्थेयम्, प्रकृत्या सह आत्मानं संयोज्य वर्तितव्यमिति वयं भारतीयाः शिक्षिताः स्मः। महात्मगान्धी तु आजीवनं पदे पदे साग्रहं तथ्यमिदम् उपास्थापयत्। साम्प्रतं भारतं climate justice-इति विषयम् उपस्थापयति। Copwv-Paris-सन्धिषु भारतेन प्रमुखा भूमिका निर्व्यूढास्ति। यदा वयम् international solar alliance-इति आन्ताराष्ट्रिय-सौर-संयुति-माध्यमेन अशेष-विश्वं संयुक्तम् अकुर्म तर्हि एतेषां सर्वेषां मूले आसीत् -महात्मगान्धिनः तस्य स्वप्नस्य प्रपूरणस्य भावः। अस्मिन् पर्यावरण-दिवसे वयं सर्वे विषयमेनं विचारयेम यत् स्वीयं पृथ्वी-ग्रहं स्वच्छं हरितञ्च सन्धारयितुं वयं किं किं कर्तुं शक्नुमः ? केन प्रकारेण वयमस्यां दिशि अग्रेसर्तुं शक्नुमः ? किं किञ्च नवाचारं कर्तुं पारयामः ? वर्षर्तुः आसन्न-प्रायः, अस्मिन् क्रमे वयं वृक्षारोपणस्य आभिलेख्यं लक्ष्यं सुनिश्चेतुं शक्नुमः, तथा च, न केवलं वृक्षारोपणमेव, परञ्च तेषां सम्वर्धन-पर्यन्तं तेषां सन्धारण-व्यवस्थापि करणीयास्ति।

मम प्रियाः देशवासिनः, विशेषेण च, मम नव-युवानः सखायः ! भवन्तः जून-मासस्य एकविंशं दिनं सुस्मरन्ति, न केवलं भवन्तः, न च केवलं वयम्, अशेष-विश्वंजून-मासस्य एकविंशं दिनं सुस्मरति । अशेष-जगति जून-मासस्य एकविंशं दिनम् आन्ताराष्ट्रिय-योग-दिवस-रूपेण आयोज्यते, तथा चेदं सर्व-स्वीकृतं जातं जनाश्च नैक-मासेभ्यः प्रागेव पूर्व-सज्जाः आरभन्ते । एतेषु दिवसेषु वृत्तानि अधिगम्यन्ते यत् कृत्स्नेह्यपि जगति जून-मासस्य एकविंशे दिने आन्ताराष्ट्रिय-योग-दिवसमायोजयितुं बहव्यः सज्जाः क्रियन्ते । yoga for unity- इत्यस्य harmonious society-इत्यस्य च अयं सन्देशोह्यस्ति यो हि जगति विगतेभ्यः कतिपयेभ्यः वर्षेभ्यः पौनःपुनिकम् अनुभूतः। संस्कृत-वाङ्मयस्य महाकविः भर्तृहरिः शताब्देभ्यः पूर्वं नैजे शतकत्रये अलिखत् -

धैर्यं यस्य पिता क्षमा च जननी शान्तिश्चिरं गेहिनी,
सत्यं सूनुरयं दया च भगिनी भ्राता मनः संयमः ।
शय्या भूमितलं दिशोऽपि वसनं ज्ञानामृतं भोजनम्,
एते यस्य कुटुम्बिनः वद ! सखे कस्माद् भयं योगिनः ।।

- शताब्देभ्यः पूर्वम् उक्तस्य कथनस्य सरलार्थोह्ययमेव यत् नियमित-योगाभ्यास-करणेन केचन समीचीनाः लाभप्रदाः गुणाः ज्ञाति—सम्बन्धिभिः मित्रैश्च तुल्याः भवन्ति । योभ्यासेन साहसं समुत्पद्यते यद्धि सदा पितृ-तुल्यं सत् अस्मान् संरक्षति। क्षमाभावः उत्पद्यते यथा मातुः निज-बालान् प्रति भवति तथा च, मानसिकशान्तिः अस्मदीयं स्थायि-मित्रं सम्पद्यते। भर्तृहरिः कथयति यत् नियमित-योगाचरणेन सत्यमस्माकं सन्ततिः,दया अस्मदीया भगिनी, आत्मसंयमः अस्माकं भ्राता, स्वयं धरणी चास्माकं शय्या, ज्ञानञ्च अस्मदीयं क्षुधा-तृप्तिकरं भोजनं भवति। यदा एते सर्वे गुणाः कस्यचन सखायो भवेयुश्चेत् योगी सर्व-वधं भयं विजयते। पुनरेकवारं सर्वान् अपि देशवासिनो विनिवेदयामि यत्ते योगस्य स्वीयं रिक्थम् अग्रेसारयेयुः तथा च, स्वस्थस्य, प्रसन्नस्य, सद्भावपूर्णस्य च राष्ट्रस्य निर्माणं कुर्युः।

मम प्रियाः देशवासिनः ! अद्य मई-मासस्य सप्तविंशो दिवसोह्यस्ति। अद्य भारतस्य प्रथम-प्रधानमन्त्रिणः पण्डित-जवाहरलाल-नेहरु-वर्यस्य पुण्यतिथिरस्ति। अहं पण्डित-वर्यं प्रणमामि। अस्य मई-मासस्य स्मृतिः अपरेण एकेन वृत्तेनापि संयुक्तास्ति, तदस्ति वीर-सावरकरस्य स्मरणम्। अष्टादश-शताब्दे सप्त-पञ्चाशत्तमे वर्षे अयमेव मई-मासः आसीत्, यदा भारतवासिनः आङ्ग्लान् विरुध्य स्वीयां शक्तिं प्रदर्शितवन्तः। देशस्य अनेकेषु भागेषु अस्मदीयाः युवानः कृषकाश्च निज-शौर्यं प्रदर्शयन्तः अन्यायं विरुध्य उत्तिष्ठितवन्तः। अयं वीर-सावरकरः एवासीत्, यो हि निर्भयम् अलिखत् यत् अष्टादश-शताब्दे सप्त-पञ्चाशत्तमे वर्षेयत्किमपि घटितं सः कथमपि विद्रोहो नासीत् अपि तु, स्वतन्त्रतायाः प्रप्रथमं युद्धमासीत्। सावरकर-वर्येण साकं लण्डनस्थितस्य India House-इत्यस्य वीराः अस्य संग्रामस्य पञ्चाशत्तमां वर्ष-पूर्तिं सोल्लासं सोत्साहञ्च आयोजितवन्तः। अयमपि अद्भुत-संयोगः एव,यदस्मिन् मासे स्वाधीनतायाः प्रथमः स्वतन्त्रः संग्रामः आरभत, तस्मिन्नेव मासे वीर-सावरकर-वर्यस्य जन्म अभवत्। सावरकर-वर्यस्य व्यक्तित्वं हि विशेषता-सम्भरितमासीत्; असौ शस्त्रस्य शास्त्रस्य च उपासकः आसीत्। सामान्यतया वयं वीर-सावरकर-वर्यं तस्य साहसार्थं आङ्ग्ल-शासन-विरोधि-संघर्षार्थञ्च जानीमः परञ्च एतदतिरिच्य सः अनन्यः ओजस्वी कविः समाज-परिष्कारकोह्यपि आसीत्, यो हि सदा सद्भावनाम् एकताञ्च प्रतिष्ठापयितुं प्रायतत। सावरकर-वर्यस्य विषये एकम् अद्भुत-वर्णनम् अस्माकम् आदरणीयेन अटल-बिहारि-वाजपेयिना कृतमस्ति। अटल-महोदयः अकथयत्-सावरकरोह्यर्थात् तेजः, सावरकरोह्यर्थात् त्यागः,सावरकरोह्यर्थात्तपः,सावरकरोह्यर्थात् तत्वम्,सावरकरोह्यर्थात् तर्कः,सावरकरोह्यर्थात् तारुण्यम्,सावरकरोह्यर्थात् शरः,सावरकरोह्यर्थात् खड्गः। कियत् समुचितमिदं चित्रणमकरोत् अटल-बिहारि-वाजपेयि-महोदयः। सावरकर-वर्यः कवितां क्रान्तिञ्च सहैव स्वीकृतवान्। सम्वेदनशील-कविः सन् युगपदेव असौ साहसिकः क्रान्तिकारी अप्यासीत्।

मम प्रियाः भ्रातरो भगिन्यश्च! अहं दृश्य-वाहिन्याम् एकां कथाम् अवलोकयन्नासम् । राजस्थाने सीकरस्य लघु-वसतीनां निर्धन-पुत्रिकाणाम् एषा कथासीत् । अस्मदीयाः एताः दुहितरः, याः कदाचित् अवकर-चयनार्थं प्रतिगृहं भिक्षाटनार्थञ्च विवशाः आसन् - साम्प्रतमेताः सीवनम् अभ्यस्य निर्धनानां देहावरणार्थं वस्त्राणि सीव्यन्ति । अत्रत्याः एताः पुत्रिकाः, साम्प्रतं नैजानि निज-कौटुम्बिकानि च वस्त्राणि अतिरिच्य, सामान्यानि विशिष्टानि च वस्त्राणि अपि सीव्यन्ति। एताः अमुना कार्येण सहैव कौशल-विकासस्य प्रशिक्षणमपि अवाप्नुवन्ति । अस्मदीयाः इमाः दुहितरः अद्य आत्मनिर्भराः सम्वृत्ताः,ससम्मानं निज-जीवनं यापयन्ति, अपि च, स्व-स्व-कुटुम्बार्थं शक्तिरूपेण प्रतिष्ठिताः सन्ति। आशा-विश्वासभ्यां सम्भरितानाम् एतासाम् अस्मदीय-पुत्रिकाणाम् उज्ज्वल-भविष्यत्कृते शुभकामनाः व्याहरामि। एताः सुसिद्धं कृत्वा प्रदर्शितवत्यः यत् किञ्चित्करणार्थं यदि समुत्साहः दृढ-सङ्कल्पः भावश्चास्ति चेत् सत्स्वपि विविधेषु विघ्नेषु सफलता-प्राप्तिः नूनं शक्यास्ति, तथा च, नैषा केवलं सीकरस्य कथास्ति, हिन्दुस्थानस्य प्रत्येकमपि कोणे भवन्तः एतत्सर्वम् अवलोकयितुमर्हन्ति। भवतः परितः, पार्श्ववर्तिषु च स्थलेषु यदि पश्यन्ति चेत् जनाः केन प्रकारेण काठिन्यानि पराभावयन्ति इति दृष्टि-गोचरं भविष्यति।

भवन्तः अनुभूतवन्तः स्युः यत् चाय-पानार्थं कदाचित् वयं चायापणं गच्छामः, तत्र चाय-पानानन्देन साकमेव कैश्चित् जनैः सह चर्चा-विचार-विमर्शादिकमपि भवति। एतत्सर्वं कदाचित् राजनीतिकमपि, सामाजिकं वा, चलचित्र-विषयकञ्च, क्रीडा-क्रीडक-सम्बद्धम् आहोस्वित्, देशस्य विविध-समस्या-विषयकमपि भवति-परञ्चैतत्सर्वं चर्चामात्रमेव भवति, तथापि केचन जनाः तादृशाः सन्ति, ये निज-कार्यैः, निज-श्रमोत्साहाभ्यां च परिवर्तन-दिशि अग्रेसरन्ति, विचारितं परिचर्चितं च सर्वं क्रियया अन्वेतुं परिनिष्ठित-भावेन प्रयतन्ते । अन्येषां स्वप्नान् आत्मसात्-कृत्वा तान् पूर्णयितुं च निजोत्सर्गं क्रियमाणानां केषाञ्चन तादृशी एव कथा उड़ीसा-राज्ये कटक-नगरे कुटीर-वसतौ निवसतः डी.प्रकाश-रावस्य अस्ति। गतदिने एवाहं डी.प्रकाश-रावेण मेलन-सौभाग्यम् अलभम्। श्रीमान् डी.प्रकाश-रावः विगतेभ्यः पञ्चभ्यः दशकेभ्यः नगरे चाय-विक्रयं करोति। भवन्तः इदं विज्ञाय आश्चर्यम् अनुभविष्यन्ति यत् सामान्यः कश्चन चाय-विक्रेता,सप्तत्यधिक-बालानां जीवनानि शिक्षया प्रकाशयति। असौ मलिन-वसति-वास्तव्यानां बालानां कृते 'आशा-आश्वासन'-नाम्ना विद्यालयमेकम् उद्घाटयत् । एतदर्थं चाय-विक्रेतायं निज-धनागमस्य प्रतिशतं पन्चाशन्मितं भागं व्ययीकरोति । असौ विद्यालयम् आगम्यमानस्य प्रत्येकमपि बालकस्य कृते शिक्षा-स्वास्थ्य-भोजनानां पूर्णां व्यवस्थां करोति । डी.प्रकाश-रावस्य कठोर-श्रमस्य, समर्पित-निष्ठायाश्च कृते निर्धन-बालानाञ्च जीवन-समुन्नयनाय भूरि भूरि वर्धापनानि वदामि । 'तमसो मा ज्योतिर्गमय'- इति वेद-वाक्यं हि को नाम न जानाति परञ्च डी.प्रकाश-रावः वेद-वाक्यमिदं जीवित्वा एतेषां निर्धन-बालानां तमोमयं जीवनं ज्योतिर्मयम् अकरोत् । एतस्य जीवनमस्मभ्यः सर्वेभ्यः, समाजस्य समग्र-देशस्य च कृते प्रेरणाप्रदं वर्तते। भवतां परिपार्श्व-वर्तिषु स्थलेष्वपि, एतादृश्यः प्रेरक-घटना-शृङ्खलाः सम्भवेयुः। अगणिताः घटनाश्च स्युः। आगच्छन्तु ! वयं सकारात्मिकताम् अग्रेसारयेम।

जून-मासे निदाघः तावान् उग्रो भवति यज्जनाः वर्षाम् आतुरतया प्रतीक्षन्ते, तथा च, आशान्विताः सन्तः नभसि मेघान् निर्निमेष-दृशा अवलोकयन्ति। इतः परं कतिपय-दिनानन्तरं जनाः चन्द्रमसमपि प्रतीक्षिष्यन्ते। चन्द्रमसो दर्शनमर्थात् ईद्-पर्वणः आयोजनं शक्यं भविता रमजान-मासावधौ मासात्मकस्य उपवासस्य अनन्तरम् ईद्-पर्व समुत्सवारम्भस्य प्रतीकत्वेन वर्तते। दृढं विश्वसिमि यत् सर्वेह्यपि ईद्-पर्व सोत्साहमायोजयिष्यन्ति। अवसरेह्यस्मिन् बालाः विशेषेण ईदीति विशिष्टोपहारमपि लभन्ते। आशासे यत् ईद्-समुत्सवः अस्माकं समाजे सद्भाव-बन्धनं दृढतरं विधास्यति। सर्वेभ्यो भूरिशो मङ्गल-कामनाः विलसन्तुतराम्।

मम प्रियाः देशवासिनः! भवतां सर्वेषां कृते कोटिशो धन्यवादाः। पुनरेकवारम् आगामिनि मासे 'मन की बात'-प्रसारणावसरे मेलिष्यामः।

नमस्कारः !

## लेखकानां कृते निवेदनम्

समोदं संसूचयामो यत् दिल्लीतः प्रकाश्यमाना संस्कृत-संवादनाम्नी पाक्षिकी पत्रिका भवतां समेषां संस्कृतानुरागिणां सृजनात्मकलेखान् गद्यत्वेन पद्यत्वेन वा आमन्त्रयति। तत्र भवल्लेखभाषा सुसंस्कृत परिष्कृत सरसा स्वकल्पिता औचित्यपूर्णं कल्याणवाहा आधुनिकभावभरिता समाजिकचैतन्यसम्भृता च स्यात्। आशास्महे भवन्तः निजपरितः जायमानानां नवीनानां घटनानां कार्यक्रमाणां च समाचारमत्र sanskritsamvad@gmail.com, सम्प्रेष्य संस्कृतसंस्कृत्योः प्रचाराय नैजं योगदानं प्रदास्यन्ति।

- संवादाय यान् लेखान् प्रेषयेयुः ते कागदस्य एकस्मिन् एव पार्श्वे लिखेयुः। पङ्क्तीनां मध्ये पर्याप्ततया अवकाशो भवेत्।
- लेखाः स्फुटैः अक्षरैः संयोजनं कारयित्वा प्रेषयन्ति तर्हि उत्तमम्।
- लेखस्य मूलं प्रति प्रेषयेयुः हस्तलिखितछायाप्रतिलेखाः न स्वीक्रिन्ते।
- लेखेषु, गीतेषु वा कुत्रापि राष्ट्रविरोधः व्यक्तिविरोधश्च न स्यात्।
- लेखस्य आदौ अन्ते वा लेखकस्य नाम अवश्यम् उल्लिखितं स्यात्।
- प्रसंगविशेषनिमित्तीकृत्य रचितः लेखः मासात् पूर्वम् एव प्रेषणीयः।
- कथाम् लेखञ्च येऽनुवादं कृत्वा प्रेषयितुम इच्छेयुः ते मूललेखकस्य अनुमतिपत्रं प्राप्य एव प्रेषयेयुः।
- ई-मेल् माध्यमेन अपि लेखादिकं प्रेषयितुं शक्यम्। तदा तु वाक्मैन-चाणक्यफोण्टद्वारा पेजमेकर इत्यस्मिन् देवनागरीलिप्यां मुद्रितैव सामग्री प्रकाशनाय सौकर्यं भवति।
- लेखाः पी.डी.एफ स्वरूपेऽपि स्वीक्रियते।
- संस्कृतजगद्वार्तासु केवलं संस्कृतभाषायामेव प्रेषणीयः।




प्रिय आर्य बन्धुओं व बहिनों,

सादर नमस्ते!

आपको ज्ञात ही होगा कि राजस्थान प्रान्त का उदयपुर नगर एक अति मनोरम नगर है। यहीं पर स्थित 'नवलखा महल' कालजयी ग्रन्थ सत्यार्थ प्रकाश की रचनास्थली है। 1992 में यह आर्यसमाज को हस्तगत हुआ था तब से अब तक प्रभु कृपा से, भगीरथ पुरुषार्थ तथा आप लोगों के स्नेह से यह एक सुन्दर स्मारक बन चुका है। जिसके दर्शनार्थ लगभग 30000 (तीस हजार) पर्यटक प्रतिवर्ष आते हैं। यहाँ प्रतिवर्ष आयोज्य सत्यार्थ प्रकाश महोत्सव भी आर्य जगत में विशिष्ट स्थान रखते हैं।

**21 वाँ सत्यार्थ प्रकाश महोत्सव दिनांक 6 अक्टूबर से 8 अक्टूबर 2018 तक आयोज्य है।**

इसी में पधारने हेतु यह अग्रिम अनुरोध है। मानस बनावें इष्टमित्रों, परिवारीजनों के साथ आने का। पर्यटन तथा धर्मलाभ साथ-साथ हो जाएगा। इस निवेदन को आए Acknowledge भी करेंगे तो प्रसन्नता होगी।



निवेदक
श्रीमद् दयानन्द सत्यार्थ प्रकाश न्यास
नवलखा महल, गुलाब बाग, उदयपुर- 313001
दूरभाष- 0294-2417694, 7229948860, 9314235101

# उदयपुरेसंस्कृतशिक्षणकेन्द्रस्य समापनम्

वार्ताहरः – नूतन विष्णु रेग्मी

उदयपुरम् – भारतसर्वकारस्य मानवसंसाधनविकास मंत्रालयस्य नवदेहल्याः राष्ट्रियसंस्कृतसंस्थानस्य च संयुक्ततत्त्वाधाने आभारतमनौपचारिकसंस्कृतशिक्षणकेन्द्राणि प्रचाल्यन्ते। एतद्योजनानुसारं हि उदयपुरस्थ पेसिफिक विश्वविद्यालयस्य प्रबंधनसंकाये अपि केन्द्रमेतत् 15 सितम्बर 2017 तमे दिनांके पेसिफिक योगमहाविद्यालये




समाचरितोद्घाटनसमारोहपुरस्सरं सभारब्धमासीत्। केन्द्रेऽस्मिन् आसत्रम् प्रणामपत्रीयपाठ्यक्रमस्य प्रथमादीक्षानुसारं छात्राः, ग्रामीणाः, कर्मचारिणश्च आहत्य 32 अध्येतारः संस्कृतभाषायाः सारल्येन अध्ययनं कृतवन्तः। फलरूपेण ते 21.04.2018 एवं च 29.04. 2018 तमयोः दिनांकयोः वार्षिकपरीक्षायामपि सोत्साहमहमहमिकया च भागं गृहीतवन्तः। प्रथमतयोद्घाटितकेन्द्रस्यास्य पथमसत्रस्य समापनम् पेसिफिक प्रबंधनसंस्थानस्य सभागारे 02.05.2018 तमे दिनांके बुधवासरे अपराह्णे द्विवादने जातम्।

केन्द्रशिक्षकस्य नूतविष्णुरेग्मीनिवेदनानंगीकृत्य तेन साकं तत्र पेसिफिक विश्वविद्यालयस्य उपाधिविभागस्य उपकुसचिवा डॉ. शीलादशोरा सारस्वतातिथिरूपे, पेसिफिकप्रबंधनसंस्थानस्य प्राचार्या एवं केन्द्राधिकृताधिकृताधिकारि पदे कार्यरता प्रो. महिमाबिरला अध्यक्षपदे, पेसिफिक विश्वविद्यालयस्य कुलपतिः डॉ. भगवतीप्रकाशशर्मा मुख्यातिथित्वेन, पेसिफिक योगमहाविद्यालयस्य प्राचार्या डॉ गुनीतमोंगाभार्गवश्च विशिष्टातिथित्वेनाधिमंच सुशोभिता आसन्। छात्रेभ्यः प्रमाणपत्राणि अग्रिमे नूतने द्वितीयेसत्रे (2018–2019) 15 जुलाई 2018 पश्चात् प्रदास्यन्ते। तदा अत्र प्रमाणपत्रीयपाठ्यक्रमेण साकं ये सत्रेऽस्मिन् उत्तीर्णाः भविष्यन्ति तेषां कृते दक्षतापाठ्यक्रमोऽपि आरप्स्यते। आधुनिकविश्वविद्यालयः सन्नपि संस्कृतं प्रति अत्रत्यानां रूचिप्रदर्शनम् श्लाघनीयं वर्तत। एवंच भारतसर्वकारस्य (डम्त्क) मानवसंसाधनविकासमंत्रालयः, राष्ट्रियसंस्कृतसंस्थानम्–मानितविश्वविद्यालयश्च उभावपि एतादृग्सुन्दरयोजनायाः आरम्भणाय धन्यवादार्हौ स्तः।

# जीवनमूल्यानां दर्शनोऽस्ति संस्कृतसाहित्यः–यतीन्द्र कुमार

नवदेहली। संस्कृत साहित्ये जीवनमूल्यानां विषये उक्तवन्तः। भौतिकवादी युगे युवा संस्कृत एवं भारतीय संस्कृतिः दूरं गच्छति। संस्कृत साहित्य माध्यमेन अस्मान् जीवनमूल्येषु स्थापित




करणस्य प्रयासः कारणीयम्। विचारोऽयं सर्वोदयकान्याविद्यालय हिमावपुरस्य प्रधानाचार्य श्रीयतीन्द्रकुमारः व्यक्तवान। श्रीकुमारः अध्ययन केन्द्रस्य समापने सम्बोधयतिस्म। अस्मिन्नवसरे अकादम्याः सचिव जीतरामभट्ट उक्तवान् यत् संस्कृतसाहित्ये निहित ज्ञान विज्ञानं विश्वं आदिकालादेव प्राप्यते। बालकान् यदि संस्कृतेः महानतायाः विषये निरन्तर कथयिष्यामि चेत् तर्हि बालकाः आदर्श एवं संस्कारयुक्त भविष्यति।

अस्मिन्नवसरे केन्द्रस्य शिक्षकः डॉ विभूतिनाथझा अपि स्वीयविचारं व्यक्तवन्तः

# संस्कृत शिविरस्य समापन समारोहः

वार्ताहरः सतेन्द्रः

01.06.2018 तमे दिनाङ्के हरियाणाराज्यस्य गुरुग्रामजनपदस्य सिसपालविहारे सायं पञ्चवादने दशदिनात्मक–शिबिरस्य समापनसमारोहः अभवत् । अस्य कार्यक्रमस्य अध्यक्षः डॉ. श्रेयांसद्विवेदी महोदयः, उपाध्यक्षः, हरियाणा संस्कृत अकादमी उपाध्यक्षः, संस्कृत भारती, हरियाणाराज्यम् चासीत् ।कार्यक्रमे अस्मिन् जनरल जी. डी. बक्शी महोदयः मुख्यातिथिरूपेण समुपस्थितः आसीत् विशिष्टातिथिः सुरेन्द्रशर्मा महोदयः, सेवानिवृत्तः जनपद–शिक्षा–अधिकारी (D.E.O.) चासीत् । कार्यक्रमस्य शुभारम्भः अध्यक्ष–मुख्यातिथि–विशिष्टातिथिभिश्च दीपप्रज्वालनेन कृतः । दीपप्रज्वालनसमये शिबिरशिक्षार्थिना राजेन्द्रेण वैदिकमन्त्रोच्चारणं कृतम् ।अस्य कार्यक्रमस्य उत्तमरीत्या सञ्चालनं




संस्कृतभारत्याः गुरुग्रामविभागसंयोजकेन श्रीमता प्रमोदशास्त्रिणा कृतम् । तदनन्तरं अस्मिन् कार्यक्रमे भागं गृहीतवत्यौ भगिन्यौ लक्ष्मी अर्चना च संस्कृतभारत्याः उद्देश्यगीतं 'मनसा सततं स्मरणीयम्'




गीतवत्यौ । तत्पश्चात् शिबिरशिक्षकेण संस्कृतभारत्याः गुरुग्रामस्य महानगर–संयोजकेन च सतेन्द्रेण संस्कृतभारत्याः परिचयः महत्त्वं च प्रतिपादितम् । तदनन्तरं शिबिरप्रतिभागिन्यौ युक्ति मुरारी महोदया अर्चना भगिनी च संभाषणशिबिरस्य महत्त्वं प्रतिपादयन्तीं लघुनाटिकां प्रदर्शितवत्यौ । एतदनन्तरं संस्कृतभारत्याः सङ्कल्पगीतं 'पठामि संस्कृतं नित्यम्, वदामि संस्कृतं सदा।' प्रियङ्का, प्रीतिः विकासः च गीतवन्तः । तत्पश्चात् शिबिरछात्रा चार्वी शिबिरार्थी श्रीमान् जयकिशनकौशिकः महोदयश्च दशदिनानां स्वानुभवं संस्कृतेन कथितवन्तौ एतस्मै शिबिराय च धन्यवादं ज्ञापितवन्तौ । श्रीमती वीना त्रेहन एकां लघुकथां 'मूढः जम्बूकः' श्रावितवती । कार्यक्रमस्य विशिष्टातिथिः सुरेंद्रशर्मा महोदयः स्वोद्बोधने संस्कृतस्य महत्त्वं प्रतिपादयन् उक्तवान् यत् इदानीं संस्कृतस्य नूतनयुगस्य प्रारम्भः अस्ति । नूनं संस्कृतस्य उत्तमकालः नातिदूरं वर्तते । तत्पश्चात् कार्यक्रमस्य मुख्यातिथिः जनरल जी. डी. महोदयः ऋग्वेदादिं वर्णयन् हरियाणाराज्यस्य सरस्वतीनद्याः संस्कृतस्य च महत्त्वं प्रतिपादितवान् । महोदयः उक्तवान् यत् कालचक्रं सततं भ्रमत् अस्ति । अधुना भारतीयसंस्कृत्याः संस्कृतस्य च उन्नतिकालः अस्ति । गुरुद्रोणाचार्यस्य ग्रामे अस्मिन् अहं संस्कृतस्य उज्ज्वलं भविष्यं पश्यामि । महोदयः एवमपि योजितवान् यत् एकवारं पुनरपि शिबिरं भवेत् येन अहमपि स्वपौत्रं पौत्रीञ्च पठनार्थं प्रेषयितुं शकनुयाम् । तदनन्तरं अध्यक्षमहोदयः डॉ. श्रेयांशमहोदयः संस्कृतस्य वैशिष्ट्यं प्रतिपादयन् संस्कृतभारत्याः विषये उक्तवान् यत् एषा संस्था पूरणरूपेण अराजनैतिक–संस्था अस्ति । पुनश्च संस्थेयम् अहर्निशं निःस्वार्थभावेन समाजस्य समाजाय समाजेन सेवां कुर्वन्ती अस्ति । कार्यक्रमस्य अन्ते संस्कृतभारत्याः निष्ठावान् कार्यकर्ता आनन्दमहोदयः सर्वेषां धन्यवादं ज्ञापितवान् । कार्यक्रमे अस्मिन् सर्वं वातावरणं संस्कृतमयम् अभवत् । एतेन सर्वेण प्रभावितः भूत्वा श्रीमान् जयकिशनकौशिकः महोदयः अस्य प्रदेशस्य आवासीयवर्गाय द्वादश सहस्रं रुप्यकाणाम् अपि आर्थिकं सहयोगं कृतवान् । सर्वे जनाः अतीव प्रमुदिताः आसन् ।

अस्माकं प्रेरणास्त्रोतः- स्व.पं० रामकिशोरशर्मा,
परामर्शकाः-डॉ.रमाकान्तशुक्लः, डॉ.रवीन्द्रनागरः, डॉ.धर्मेन्द्रकुमारः, डॉ.बलदेवानन्दसागरः, आचार्यपंकजः, डॉ. अरविन्दतिवारीः
सम्पादिका-मञ्जूशर्मा, उपसम्पादकः- डॉ. सन्नीकुमार, संदीप कुमार उपाध्याय, राजेशझाः, प्रबन्धसम्पादकौ- वेदप्रकाशशर्मा, नेहाशर्मा च,

स्वत्वाधिकारिण्या, मुद्रिकया, प्रकाशिकया सम्पादिकया च मञ्जूशर्ममहोदयया राहुल-ऑफसेट-प्रिंटर्स, 521/8 कृष्णागली सं. 14, मौजपुरनगरम्, देहली-53तः मुद्रापयित्वा ए-2/32, वजीराबादमार्गः भजनपुरा, देहली-53 इत्यतः प्रकाशितम्।
दूरभाष : 09311086751 ई-मेलः sanskritsamvad@gmail.com, RNI No. : DELSAN/2011/38660 DL(E)-21/5379/2014-16 राष्ट्रियसंस्कृतसंस्थानस्य अनुदानेन प्रकाश्यमानं पत्रमिदम्।